मुद्राराक्षसम्

३१८

श्रीपदकारि

मुद्रानाटक

७३

मुरा·लं·
१

॥श्रीगणेशायनमः॥धन्याकेयंस्थितातेशिरसिशशिकलाकिंनुनामैतदस्यानामैवास्यास्तदेतत्परिचि
तमपितेविस्मृतंकस्यहेतोः।नारींपृच्छामिनेन्दुंकथयतुविजयानप्रमाणंयदीन्दुर्देव्यानिह्नोतुमिच्छोरिति
तिसुरसरितशाठ्यमव्याद्विभोर्वः॥१॥अपिच।पादस्याविर्भवंतीमवनतिमवनेरक्षतःस्वैरपातैःसंको
चैनैवदोष्णांमुहुरभिनयतःसर्वलोकातिगानाम्।दृष्टिंलक्ष्येषुनोग्रज्वलनकणमुचंवध्नतोदाहभीतेरि
त्याधारानुरोधात्त्रिपुरविजयिनःपातुवोदुःखनृत्तं॥२॥नांद्यंतेसूत्रधारः।अलमतिप्रसंगेन।आज्ञा
पितोस्मिपरिषदायथाद्यत्वयासामंतवटेश्वरदत्तपौत्रस्यमहाराजपदभाक् पृथुसूनोःकवेर्विशाख
दत्तस्यकृतिरभिनवंमुद्राराक्षसंनाम नाटकंनाटयितव्यमिति।यत्ससंकाव्यविशेषवेदिन्यांपरिषदि
प्रयुंजानस्यममापिचेतसिसुमहान्परितोषःप्रादुर्भवति॥ ॥कुतः॥ ॥चीयतेबालिशस्यापिसुक्षे
त्रपतिताकृषिः।नशालेस्तंबकरितावप्तुर्गुणमपेक्षते॥३॥तद्यावदिदानींगृहंगत्वागृहिणीमा

श्री॰
१

हंगृहजनेनसहसंगीतकमनुतिष्ठामीति।परिक्रम्यावलोक्य च· इमे नो गृहाः यावत्प्रविशामि।नाट्येनप्रविश्या
वलोक्य च।अयेतत्किमिदमस्मद्गृहेषु महोत्सव इव दृश्यते।यतः।स्वस्वकर्मण्यधिकतरमभियुक्तः परिजनः॥ ॥
तथाहि॥ ॥वहति जलमियंपपि नष्टिगंधानि पयिपमुद्ग्रथते स्रजो विचित्राः।मुशलमिदमियंचपातकालेमुहु
रनुपातिकलेनहुंकृतेन।४।भवतु कुटुंबिनीमाहूय पृच्छामि।नेपथ्याभिमुखमवलोक्य·गुणवत्युपायनिलये
स्थितिहेतोः साधिके त्रिवर्गस्य॥मद्भवननीतिविद्ये कार्याचार्ये द्रुतमुपेहि॥५॥प्रविश्य नटी।अज्ज इअह्मि·
अस्माणिओएणमं·अज्जो·आणुगेह्णदु।सूत्र·आर्ये·तिष्ठतु तावदाज्ञानियोगः।कथय तु किमद्य भवत्या तत्र
भवतां ब्राह्मणानामुपनिमंत्रणेन कुटुंबकमनुगृहीतमभिमता वा भवनमतिथयः संप्राप्ताः यत एष पाकविशेषा
रंभः॥नटी·अज्ज·आमंतिदा·मए·भअवंतो·बह्मणाः सूत्र·आर्ये कथय कस्मिन्निमित्ते।नटी·उवरज्जति·कि
ल·भअवं।चंदो·त्ति·सूत्र·आर्ये·क एवमाह·नटी·एवं·खु·णअरवासीजणो मंतेदि·सूत्र·आर्ये कृतपरिश्र

मोस्मिचतुःषष्ट्यंगेज्योतिःशास्त्रे।तत्प्रवर्त्ततांभगवतोब्राह्मणानुद्दिश्यपाकः।चंद्रोपरागंप्रतितुकेनापिविप्रल
ब्धासि।पश्य।क्रूरग्रहःसकेतुश्चंद्रमसंपूर्णमंडलमिदानीं।अभिभवितुमिच्छतिबलात्।नेपथ्ये।आःकएष
मपिस्थिते।रक्षत्यनंतुबुधयोगः॥६॥नटी॥अज्जकोउणाधरणीगोअरोभविअचंदंगहाभिओगादोरक्खिव
दुंइच्छदि।सूत्र·आर्येयत्तत्त्व·मयानोपलक्षितः।भवतुभूयोभियुक्तःसन्स्वरव्यक्तिमुपलक्ष्ये।क्रूरग्रहः
सकेतुरितिपुनःपठति।नेपथ्ये·कएषमपिस्थितेचंद्रगुप्तममभिभवितुमिच्छति॥सूत्र·आकर्ण्यआर्येज्ञातं
कौटिल्यः।नटी·भयंनाटयति।सूत्र·कौटिल्यःकुटिलमतिःसएषयेनक्रोधाग्नौप्रसभमदाहिनंदवंशः।
चंद्रस्यग्रहणमितिश्रुतेःसनाम्नोमौर्येंदोर्द्विषदभियोगइत्यवैति॥७॥तदिआवांगच्छावइतिनिष्क्रांतौप्र
स्तावना॥ततःप्रविशतिमुक्तांशिखांपरिमृशन्सक्रोधश्चाणक्यः॥चाण·आःकएषमपिस्थितेचंद्रगुप्त
मभिभवितुमिच्छति॥ ।।पश्य।आस्वादितद्विरदशोणितशोणशोभांसंध्यारुणामिवकलांशशलांछनस्य

।जृंभाविदारितमुखस्यमुखात्स्फुरंतींकोहर्तुमिछतिहरेःपरिभूयदंष्ट्रां॥८॥अपिच॥नंदकुलकालभुजंगीकोपानलबहुलनीलधूमलतां।अद्यापिबध्यमानांवध्यःकोनेच्छतिशिखांमे॥९॥किंच।उल्लंघयन्ममसमु
ज्वलतःप्रतापंकोपस्यनंदकुलकाननधूमकेतोः।सद्यःपरात्मपरिमाणविवेकमूढःकःशालभेनविधिनाल
भतांविनाशम्॥१०॥शार्ङ्गीरवः।प्रविश्यशिष्यः।उपाध्यायआतापप।चाण०वत्सउपवेष्टुमिछामिशिष्यः।
उपाध्याय०नन्वियंसदासन्निहितवेत्रासनेवद्वाःप्रकोष्ठशालातदस्यामुपवेष्टुमर्हत्युपाध्यायः।चाणः०व
त्सकार्याभिनियोगएवास्मान्व्याकुलयति०नपुनरुपाध्यायसहभूःशिष्यजनेदुःशीलता।नाट्येनोपविश्य०
आत्मगतं०कथंप्रकाशतांगतोयमर्थःपौरेषु॥यथाकिलनंदकुलविनाशजनितरोषोराक्षसःपितृवधा
मर्षितेनसकलनंदराज्यपरिपणनप्रोत्साहितेनपर्वतकपुत्रेणमलयकेतुनासहसंधायतदुपगृहीतेनच
महताम्लेछराजबलेनपरिवृतोवृषलमभियोक्तुमुद्यातइतिविचिंत्य।अथवायेनमयासर्वलोकप्रकाशं

नंदवंशवधप्रतिज्ञापतिस्तीर्णादुस्तराप्रतिज्ञासरित सोहमिदानींप्रकाशीभवंतमप्येनमर्थंसमर्थःप्रशमयितुं।कुतः
।यस्यमम।श्यामीकृत्याननेंदूनरियुवतिदिशांसंततैःशोकधूमैःकामंमंत्रिद्रुमेभ्योनयपवनहृतंमोहभस्मप्रकीर्य
दग्ध्वासंभ्रांतपौरद्विजगणरहितान्नंदवंशप्ररोहान्दाह्याभावान्नखेदाज्ज्वलनइववनेशाम्यतिक्रोधवह्निः॥११
॥अपिचशोचंतोवनतैर्नराधिपभयाद्धिक्शब्दगर्भैर्मुखैर्मामग्रासनतावकृष्टमवशंयेदृष्टवंतःपुरातेपश्यंति
तथैवसंप्रतिजनानंदंमयासान्वयंसिंहेनेवगजेंद्रमद्रिशिखरात्सिंहासनात्पातितं॥१२॥सोहमिदानीमवसि
तप्रतिज्ञाभारोपिवृषलापेक्षयाशस्त्रंधारयामि।येनमया।समुत्खातानंदानवहृदयरोगाइवभुवःकृतामौर्येल
क्ष्मीःसरसिनलिनीवस्थिरपदा।द्वयोःसारंतुल्यंद्वितयमभियुक्तेनमनसाफलंकोपप्रीत्योर्द्विषतिचविभ
क्तेसुहृदिव॥१३॥अथवाअगृहीतेराक्षसेकिमुत्खातंनंदवंशस्यकिंवास्थैर्यमुत्पादितंचंद्रगुप्तलक्ष्म्याः
।विचिंत्य।अहोराक्षसस्यनंदवंशेनिरतिशयोभक्तिगुणः।सखलुकस्मिंश्चिदपिजीवतिनंदान्वयावयवे

बलस्य साचिव्यं ग्राहयितुं न शक्यते। तदभियोगं प्रतिनिरुध्योगः शक्यो वस्थापयितुं इति अस्माभिरनयैव बु-
द्ध्या तपोवनगतोऽपि घातितस्तपस्वी नंदवंशीयः सर्वार्थसिद्धिः। यावत् सौमलयकेतुमंगीकृत्यास्मदुच्छे-
दाय विपुलतरं प्रयत्नमुपदर्शयत्येव। प्रत्यक्षवदाकाशे लक्ष्यं बध्वा· साध्वमात्यराक्षस साधु साधु मंत्रि-
श्रोत्रिय साधु साधु मंत्रिबृहस्पते साधु· कुतः· ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते तं गच्छंत्यनु ये वि-
पत्तिषु पुनस्ते तत्प्रतिष्ठाशया। भर्तुर्ये प्रलयेऽपि पूर्वसुकृतासंगेन निःसंगया भक्त्या कार्यधुरां वहंति वहवस्ते
दुर्लभास्त्वादृशाः॥१४॥ अत एवास्माकं त्वत्संग्रहे यत्नः। कथमसौ वृषलस्य साचिव्यग्रहणेन सानुग्रहः
स्यादिति। कुतः। अप्राज्ञेन च कातरेण च गुणः स्यात्सानुरागेण कः प्रज्ञाविक्रमशालिनोऽपि हि भवेत्किं भक्ति-
हीनात्फलं। प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भूतये ते भृत्या नृपतेः कलत्रमितरे संपत्सु चापत्सु
च॥१५॥ तन्मयाप्यस्मिन्वस्तुनि न शयानेन स्थीयते। यथाशक्ति क्रियते तद्ग्रहणं प्रति यत्नः। कथमिव·

मु·रा·सं·
४

अत्रतावद्बहुषलपर्वतकयोरन्यतरविनाशेपिचाणक्यस्यापकृतंभवेतीतिविषकन्ययाराक्षसेनास्माकम
त्यंतोपकारिमित्रंघातितस्तपस्वीपर्वतकइति संचारितोजनापवादो।लोकप्रत्ययार्थअस्यैवार्थस्याभिव्य
क्तयेपितातेचाणक्येनघातितइतिरहसित्रासयित्वाभागुरायणेनापवाहितःपर्वतकपुत्रोमलयकेतुः
॥शक्यःखल्वेषराक्षसमतिपरिगृहीतोपिव्युत्तिष्ठमानःप्रज्ञयानिग्रहीतुं।नपुनरस्यनिग्रहात्पर्वतक
वधोत्पन्नंराक्षसस्यायशःप्रकाशीभवत्प्रमाष्टुमिच्छामिप्रयुक्ताश्चस्वपक्षपरपक्षयोरनुरक्तापरक्तजन
जिज्ञासयाबहुविधदेशवेषभाषाचारसंचारवेदिनोनानाव्यंजनाःप्रणिधयः।अन्विष्यंतेचकुसुमपुरवा
सिनांनंदामात्यसुहृदांनिपुणंप्रचारगतं।तत्तत्कारणमुत्पाद्यकृतकृत्यतामापादिताश्चंद्रगुप्तस
होत्थायिनोभद्रभटप्रभृतयःप्रधानपुरुषाः।शत्रुप्रयुक्तानांचतीक्ष्णरसदायिनांप्रतिविधानंप्रत्यप्र
मादिनःपरीक्षितभक्तयःक्षितिपतिप्रत्यासन्नाःनियोजितास्तत्राप्तपुरुषाः।अस्तिचास्माकंसहाध्या

श्री०
४

यिमित्रमिंदुशर्मा नाम ब्राह्मणः स चौशनस्यां दंडनीत्यां चतुःषष्ठ्यंगे ज्योतिःशास्त्रे च परं प्रावीण्यमुपगतः
समयाक्षपणकलिंगधारी नंदवंशवधप्रतिज्ञानंतरमेव कुसुमपुरमुपनीय सर्वैर्मात्यैः सह सख्यं ग्रा
हितो विशेषतश्च तस्मिन् राक्षसः समुत्पन्नविश्रंभस्तेनेदानीं महत्प्रयोजनमनुष्ठेयं भविष्यति। तदेवम
स्मन्नो न किंचित्परिहास्यते॥ ॥वृषल एव केवलं प्रधानप्रकृतिष्वस्मास्वारोपितराज्यतंत्रभारः सतत
मुदास्ते। अथवा यत्स्वयममभियोगदुःखैरसाधारणैरप्याकृतं तदेव राज्यं सुखयति॥ कुतः॥ स्वयमाहृत्य भुं
जाना बलिनोऽपि स्वभावतः। गजेंद्राश्च नरेंद्राश्च प्रायः सीदंति दुःखिताः॥१६॥ ततः प्रविशति यमपटे
न चरः। पणमह जमस्स चलणं किं कज्जं देवएहिं अण्णेहिं। एसो खु अण्णभत्ताणं हरइ जीअं चउपडंतं
॥१७॥ अवि अ। पुरिसस्स जीविदव्वं विसमादो विहोदि भत्तिगहिआदो। मारेइ सव्वलोअं जो तेण जमेण
जाआमो॥१८॥ जाव एदं गेहं पविसिअ जमपडं दंसअंतो गीआइं गाआमि इति परिक्रामति। शिष्यः

विलोक्य भद्र न प्रवेष्टव्यं। चरः हं हो ब्रह्मण कस्स एदं गेहं। शिष्यः। अस्माकमुपाध्यायस्य सुगृहीतनाम्न आ
र्यचाणक्यस्य। चरः। विहस्य। हं हो ब्रह्मण अत्तकेकेरस्स ज्जेव मम धम्मभाउणो घरं होहि। ता देहि मे पव
संजावदे उपज्झाअस्स जम्म परं यमाणि धम्मं उपदिसामि। शिष्यः। सक्रोधं। धिङ्मूर्ख किं भवानस्मदुपाध्या
पादपि धर्मवित्तरः। चरः। हं हो बह्मण मा कुप्प। ण हि सव्वो सव्वं जाणादि। ता किंवि दे उवज्झाओ जानादि किं
वि अह्मारिसा जानंदि। शिष्यः। मूर्ख सर्वज्ञतामुपाध्यायस्य चोरयितुमिच्छति। चरः। हं हो ब्राह्मण। जइ दे
उवज्झाओ सव्वं जाणादि ता जाणादु दाव कस्स चंदो ऽनभिप्पेदोत्ति। शिष्यः। किमनेन ज्ञातेनाज्ञातेन वा
। चरः। तव उवज्झाओ एव्व जाणिस्सदि जं इमिणा जाणिदेण होदि। तुमं दाव एत्तिअं जाणासि कमलाणं चं
दो अणभिप्पेदोत्ति। णं पेक्ख। कमलाणं मणहराणं विरूअहि ता विसंवइ सीलं। संपुण्णमउलंमि विज्जा
इं चंदे विरुद्धारं॥१९॥ चाणक्यः। आकर्ण्य। आत्मगतं। अपे चंद्रगुप्तादपरक्तान्पुरुषाञ्जानामीत्युपक्षिप्त

मनेन। शिष्यः मूर्ख किमिदमसंबद्धमभिधीयते। चरः हे हो बह्मण स्तुसंबद्धं ज्जेव एदं भवेत् शिष्यः यदि
किं स्यात्। चरः जदि सुणिदुं जाणिदुं लहे। चाण· भद्र विश्रब्धं प्रविश लप्स्यसे श्रोतारं ज्ञातारं च· चरः एसो
पविसामि। इति। प्रविश्यापसृत्य च जेदु अज्जो· चाण· विलोक्य· आत्मगतं। कथमयं प्रकृति चित्त
परिज्ञाने नियुक्तो निपुणकः प्रकाशं· भद्र स्वागतं उपविश· चरः जं अज्जो आणवेदि· भूमावुपविष्टः
चाण· भद्र वर्णयेदानीं स्वनियोग वृत्तांतं अपि वृषलमनुरक्ताः प्रकृतयः। चरः। अहं। अज्जेण खु तेसु
तेसु विरागकारणेसु परिहरिअंतेसु सुगहीदनामहेअे· देवे· चंदउत्ते दिढमणुरत्ताओ पकिदिओ· किं
दु अत्थि एत्थ णअरे अमच्चरक्कसेण सह पढमसमुप्पण्णसिणेह बहुमाणा तिण्णि पुरिसा जे देवस्स
चंदसिरिणो सिरिं ण सहंदि। चाण· सक्रोधं· ननु वक्तव्यं स्वजीवितं न सहंत इति· भद्र अपि ज्ञायते नाम
धेयतः· चरः कहं अज्जाणिअ णामहेपा अज्जास्स णिवेदिअंति। चाण· तेन हि श्रोतुमिच्छामि· चरः। सु

गाढ़ं अज्जोपढमं दाव अज्जस्स रिपुपक्खे बहुपरक्कववादो रववंणा अोजीवसिद्धी· चाणक्यः· सहर्षमात्मगतं·
अस्मद्रिपुपक्षे बहुपक्षपातः क्षपणकः· चरः· जीवसिद्धी णाम सो जेण सा अमच्चरक्खसप्पउत्ता विसक
ण्णा देवे पव्वदीसरे समावेसिदा· चाणक्यः· स्वगतं· जीवसिद्धिरेष तावदस्मत्प्रणिधिः। प्रकाश· भद्र अथा
परः कः· चरः। अज्ज अवरोपि अमच्चरक्खसस्स पिअवअस्सो काअत्थो सअडदासो णाम· चाण· विहस्य·
आत्मगतं· कायस्थ इति लघ्वी मात्रा· तथापि न युक्तं प्राकृतमपि रिपुमवज्ञातुं तस्मिन्मया पुहृच्छद्म
ना सिद्धार्थको विनिक्षिप्तः· प्रकाशं· भद्र ततीयं श्रोतुमिच्छामि। चरः। तिदीओ वि अमच्चरक्खसस्स दुदी
अहिअअं पुप्फपुरनिवासी मणिआरसेट्ठी चंदणदासो णाम। जस्स गेहे कलत्तं णासीकदुअ अमच्च
रक्खसो णअरादो अवक्कंतो॥ चाण॰ नूनं सुहृत्तमः। न ह्यनात्मसदृशे राक्षसः कलत्रं न्यासीकरिष्यति॥ प्र
काशं॥ भद्र चन्दनदासस्य गृहे राक्षसेन कलत्रं न्यासीकृतं कथमवगम्यते· चरः· अज्ज इअं अंगुलीअ

अमुदाअज्जं अवगरत्थं करिस्सदि। इत्यर्पयति। चाण॰ मुद्रामवलोक्य॰ गृहीत्वा॰ राक्षसस्यनाममवाचय
ति॰ सहर्षं॰ स्वगतं॰ ननुवक्तव्यं राक्षस एवास्मदंगुलीप्रणयी संवृत्त इति॰ प्रकाशं॰ भद्र अंगुलीमुद्राधिग
मं विस्तरेण श्रोतुमिच्छामि॥ चरः॥ सुणादु अज्जो॰ अत्थि दाव अहं अज्जेण पोरजणाचरिदस्स अण्णेसणे
णिउत्तो परघरप्पवेसे परस्स अणासंकणिज्जेण इमिणा जमपडेण हिंडंतो मणिआरसेट्ठि चंदणदा
सस्स गेहं पविट्ठोम्हि तहिं जमपडं पसारिअ पउत्तोम्हि गीआनि गाइदुं॥ चाण॰ ततः किं॰ चरः॰ तदो अ
एक्को अववरकोदो पंचवरिसदेसीओ पिअदंसणीअसरीराकिदी सुकुमारओ बालत्तणसु
लहकोहूहलोफुल्लणअणो णिक्कमिदुं पउत्तो तदो हा णिग्गदो हा णिग्गदो त्ति संकापरिग्गह
णिवदइत्तिघो अतस्स एव अववरकस्स अब्भंतरे इत्थिआ जणस्स उट्ठिदो कलकलो॰ तदो ईसि
दारदेसदाविदमुही एएक्काए इत्थिआए सो कुमारओ णिक्कमंतो एव्व णि- त्थिअ अवलं

विदो·कोमलाए बाहुलदाए तस्साए कुमारसंरोधसंभमप्पचलिदङ्गुलीदो करादो पुरिसस्स अंगुलीपरिणाहप्प
माणा घडिआ इअं अंगुलिमुद्दिआ देहलीबंधम्मि पडिआ उट्ठिदा अ ताए अणवबुद्धाए बम्हणचलणपासे
समागत्थिअ अप्पणामणिद्धआ आकुलवह्नविअणिच्चला संवुत्ता· मए वि अमच्चरक्खसस्स णामंकिदेत्ति अ
ज्जस्स पादमूलं पाविदा· ताए सो इमाए आअमो: चाण· भद्र श्रुतमयम स्नचिरादस्य परिश्रमस्यानुरू
पं फलमधिगमिष्यसि। चर:· जं अज्जो आणवेदित्ति निःक्रांतः। चाण: शार्ङ्गरव गतं· किमत्र लिखामि·
अनेन खलु लेखेन राक्षसो जेतव्यः· प्रविश्य प्रतीहारी· जेदु अज्जो· चाण: सहर्षमात्मगतं· गृहीतो जय
शब्दः प्रकाशं· शोणोत्तरे किमागतप्रयोजनम्।। प्रती· अज्ज देवो चंदसिरी सीसेकमलमुउलाआरं
अंजलिं णिवेसिअ अज्जं विण्णवेदि· इच्छामि अज्जेण अब्भणुण्णादो देवस्स पव्वदीसरस्स पारलोइअं
करेंदु· तेण अधारिदपुव्वाइं आहरणाइं बम्हणाणं पडिवादमित्ति· चाण: सहर्षमात्मगतः साधु वृषल

ममैवहृदयेन सहसंमंत्र्यसंदिष्टवानसि· शोणोत्तरेउच्यतामस्मद्वचनाद्वृषलः। साधुवत्स अभिज्ञःखल्व
सिलोकव्यवहाराणांतदनुष्ठीयतामात्मनोभिप्रायः· किंतुपर्वतेश्वरस्यधृतपूर्वाणिगुणवंतिभूषणानि
गुणवद्भ्यएवप्रतिपादयितव्यानि· तदहंस्वयमेवपरीक्षितगुणान्ब्राह्मणान्प्रेषयामि· प्रती· जंअज्जोआ
णवेदित्तिनिष्क्रांता॥ चाण· शार्ङ्गरव· उच्यतामस्मद्वचनाद्विश्वावसुप्रभृतयस्त्रयोभ्रातरः वृषलात्प्रति
गृह्याभरणानिभवद्भिरहंद्रष्टव्यइति· शिष्यः· तथेतिनिष्क्रांतः। चाणक्यः उत्तरोयंलेखार्थः पूर्वंकथम
स्तु· विचिंत्य· आः ज्ञातमुपलब्धवानास्मिप्रणिधिभ्यः· यथातस्यम्लेच्छराजलोकस्यमध्यात्प्रधानतमाः
पंचराजानः परयासुहृत्तयाराक्षसमनुवर्त्तंते तेयथा· कौलूतश्चित्रवर्मामलयनरपतिः सिंहनादोनृसिं
हः काश्मीरःपुष्कराक्षः क्षतरिपुमहिमासैंधवः सिंधुषेणः। मेघाख्यःपंचमोस्मिन्पृथुतुरगबलः पा
रसीकाधिराजोनामान्येषांलिखामिध्रुवमहमधुनाचित्रगुप्तःप्रमार्ष्टु॥ २०॥ अथवा· नलिखामि। पूर्वं

मनभिव्यक्तमेवास्तां॰ नाम्नेन लिखित्वा॰ शार्ङ्ग॰ र प्रविश्य शिष्यः। र उपाध्याय आज्ञापय॰ चाण॰ वत्स श्रोत्रिया
क्षराणि प्रयत्नलिखितान्यपि नियतमस्फुटानि भवंति। तदुच्यतामस्मद्वचनात्सिद्धार्थकः। एभिरक्षरैः केना
पि कस्यापि स्वयं वाच्यमिति॰ अदत्त्वात्यनामानं लेखं शकटदासेन लखयित्वा मामुपतिष्ठस्व। न चाख्येय
मस्मै चाणक्यो लिखयतीति। शिष्यः तथेति निःक्रांतः॰ चाणः स्वगतं॰ हंत जितो मलयकेतुः॰ प्रविश्य लेख
हस्तः सिद्धार्थः॰ जेदु अज्जो॰ अअं सो सअडदासेण लिहिदो लेहो॰ चाणः गृहीत्वा॰ अहो दर्शनीया
न्यक्षराणि॰ अनुवाच्य भद्र अनया मुद्रया मुद्रयैनं॰ सिद्धा॰ तथा कृत्वा॰ अज्ज अअं मुद्दिदो लेहो। किं अवरं
अणुचिट्ठीअदु॰ चाण॰ भद्र कस्मिंश्चिदाप्तजनानुष्ठेये कर्मणि त्वां व्यापारयितुमिच्छामि। सिद्धा॰ सह
र्षं॰ अज्ज अनुगिहीदोम्हि॰ आणवेदु अज्जो किं इमिणा दासजणेण अज्जस्स अणुचिट्ठिदव्वं॰ चाण॰
प्रथमं तावद्वध्यस्थानं गत्वा घातकाः सरोषदक्षिणाक्षिसंकोचं संज्ञां ग्राहयितव्याः। ततस्तेषु गृहीतशं

केतेषुभयापदेशादितस्ततःप्रद्रुतेषुशकटदासोवध्यस्थानादपनीयराक्षसंप्रापयितव्यः तस्मात्सुहृत्प्रा
णपरिरक्षणपरितुष्टात्पारितोषिकंप्राप्यराक्षसएवकञ्चित्कालंसेवितव्यः ततः प्रत्यासन्नेषुपरेषुप्रयो
जनमिदमनुष्ठेयं।कर्णेएवमिव·सिद्धा·जंअज्जोआणवेदि·चाण·शार्ङ्ग्रवप्रविश्यशिष्यः उपाध्यायाज्ञा
पय·चाण·उच्यतामस्मद्वचनात्कालपाशिकोदंडपाशिकश्चःयथावृषलःसमाज्ञापयति·यएषक्षप
णकोजीवसिद्धिर्नामराक्षसप्रयुक्तोविषकन्ययापर्वतकंघातितवान·सएनमेवदोषप्रख्याप्यसनि
कारंनगरान्निर्वास्यतामितिशिष्यः·तथेतिपरिक्रामति·चाण·वत्सतिष्ठऽयोपमपरःकायस्थःशकट
दासोनामराक्षसप्रयुक्तोनित्यमस्मच्छरीरमभिद्रोग्धुमिहप्रपतते।सचाप्येनंदोषंप्रख्याप्यमूलमा
रोप्यतांगृहजनश्चास्यबंधनागारंप्रवेश्यतामिति।शिष्यःयदाज्ञापयत्यार्यइतिनिष्क्रांतः·चाण·चिं
तांनाटयति·आत्मगतं अपिनामदुरात्माराक्षसोगृह्येतः·सिद्धा·अज्जगिहीदो।चाणःसहर्षमा

स्वगतं· हन्त गृहीतो राक्षसः प्रकाशं· भद्र कोपं गृहीतः· सिद्धा· गिह्णीदो अज्ज संदेसो· ता गमिस्सं कज्जसि
द्धीए· चाण· सांगुलीयं लेखमर्पयित्वा गम्यतामस्तु ते कार्यसिद्धिः· तथेति निष्क्रान्तः· प्रविश्य शिष्यः· उ
पाध्याय कालपाशिको दण्डपाशिकश्चोपाध्यायं विज्ञापयतः। इदमनुष्ठीयते देवस्य चन्द्रगुप्तस्य शास
नमिति· चाण· शोभनं· वत्स मणिकारश्रेष्ठिनं चन्दनदासं द्रष्टुमिच्छामि· शिष्यः। तथेति निष्क्रम्य· चं
दनदासेन सह प्रविश्य· इत इतः श्रेष्ठिन्· चंदनदासः· स्वगतं· चाणक्कम्मि अकरुणे सहसा सद्दा
विअस्स विजणस्स णिद्दोसस्स वि संका किं उण मह जादद्दोसस्स· ता भणिदा मए धणसेणप्पमुहा
णिअणिवेससंटिआ· कदावि चाणक्कहदओ गेहं विचिणावेदि· ता अवहिदा णिव्वहेह भट्टिणो
अमच्चरक्खसस्स घरअणं· मम दाव जं होदि तं होदु त्ति· शिष्यः· भो श्रेष्ठिन् इत इतः· चंदनः· अज्ज अअं अ·
आअच्छामि· उभौ परिक्रामतः· शिष्यः· उपसृत्य· उपाध्यायायं श्रेष्ठी चंदनदासः· चन्दनः· जेदु अज्जो· चा

णा· नाद्येनावलोक्य· अये षित्त्वागतामिदमासनमास्यतां· चंद· प्रणम्य· किंणजाणादि अज्जोजह अणु
च्चिदो उव आरोहि अअस्स परिहवादो विहु कवमुप्पादेदि ता इह जेव्व उचिदाए भूमिए उपविसामि·
चाण· भो अये षित्तमो मेवं संभावितमेवेदमस्मद्विधैर्भवतः तदुपविश्यतामासन एव· चंद· स्वगत उव
किवत्तं णो ण दुहेण किंति· प्रकाशं· जं अज्जो आणावेदि त्रिभूमावुपविष्टः चाण· भो अये षित तचंदनंदा
स अपि प्रचीयंते व्यवहाराणां वृद्धिलाभाः। चंद· स्वगतं· अत्रादरो संकणीओ प्रकाशं· आहरं·
अज्जस्स प्पसाएण अखंडिदा मे वाणिज्जा· चाण· न खलु चंद्रगुप्तदोषा अतिक्रांतपार्थिवगुणा
न धुना स्माय्येति प्रकृतीः· चंद· कर्णौपिधाय· संतं पावं ऽसा अरणिसासमगाए ण विअयुसिमा
वंदरा चंदा सेरिणा अहिणंदादि पकिदिओ· चाण· भो अये षित्तन्यप्येवम्प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रि
यमिच्छंति राजानः· चंद· आणावेदु अज्जा किंत्ति अइमादो जणादो इच्छा अदित्ति· चाण· भोः अ

मुद्रा· लं·
१०
10

ष्टिन्नंचंद्रगुप्तराज्यमिदंननंदराज्यंयतोनंदस्यैवार्थरूचेरर्थसंबंधःप्रीतिमुत्पादयतिचंद्रगुप्तस्यतुभवता
प्रष्टव्यास्मः·चंद·आणवेदुअज्जो·चाणः संक्षेपतः राजन्यविरुद्धाभिर्वृत्तिभिर्भवितव्यं·चंद·अज्जको
उणअधम्मोरण्णाविरूद्धोत्तिअज्जेणअवगच्छीअदि·चाणः संक्षेपतः राजन्यविरुद्धाभिर्वृत्तिभिर्भवि
+मपरिक्लेशएव·चंद·सहर्षं·अज्जअणुगिहीदम्हि·चाण·भोश्रेष्ठिन्सचापरिक्लेशः कथमाविर्भ
वतीतिननुभवती+ वितव्यं·चंद·अज्जकोउणअधम्मोरण्णाविरूद्धोत्तिअज्जेणअवगच्छीअदि·चा
ण·भवान्भवानेवतावत्प्रथमं·चंद·कण्णोपिधाय·संतंपावं·कीदिसोतिणाणं अग्गिणासहविरोहो·चा
ण·अयमीदृशोविरोधःयस्त्वमद्यापिराजापथ्यकारिणोऽमात्यराक्षसस्यगृहजनंस्वगृहमभिनी
परक्षसि·चंद·अज्जअलीअंएदंकेणाविअणभिण्णेणअज्जस्सणिवेदिदं·चाण·भोश्रेष्ठिन्अ
लमनयाशंकया·भीताःपूर्वराजपुरुषाःपौराणामनिच्छतामपिगृहेषुगृहजनंनिक्षिप्यदेशांतरंव्रजं

श्री·
१०

त्ति· ततस्तत्प्रच्छादनं प्रदोषत्वमापादयति· चंद· एव्वं णेदं· तस्सिं समए आसि· अम्ह घरे अमच्चरक्खस
स्स घरअणो त्ति· चाण· पूर्वमनृतमिदानीमासीदिति परस्परविरोधिनी वचने· चंद· एत्तिअं जेव्व अ
त्थि मे वाआकुले· चाण· भोः श्रेष्ठिन् चंद्रगुप्ते राजनि अपरिग्रहः छलानां तत्समर्पय राक्षसस्य गृह
जनं अच्छलं भवतः· चंद· अज्ज णं विसाबेमि अज्जा सि अम्ह घरे अमच्चरक्खसस्स घरअणो त्ति· चाण·
अथेदानीं क्व गतः· चंद· ण जाणामि· चाण· स्मितं कृत्वा· कथं न ज्ञायते नाम· भोः श्रेष्ठिन् शिरसि
भयं अतिदूरे तत्प्रतीकारः· चंद· स्वगतं· उवरि घणं घणरडिअं दूरे दइदा किमेतं आवडिदं। हिमवदि
दिव्वोसहिओ सीसे सप्पो समाविट्ठो॥ २२॥ रपमार्यप्रक्षिप्ताः· चाण· अन्यच्च· नंदमिव विह्णुरि
प्तर्द्धो केलज्जां नाटयति। चंद्रगुप्तममात्यराक्षसश्छेत्स्यतीति मामेवं प्रस्थाः· पश्य· विक्रांतैर्नयशालि
भिः सुसचिवैः श्रीवक्रनासादिभिर्नंदे जीवति यात दानगमिता स्थैर्यं वलंती मुहुः। तामेकत्वमुपाग

तांधुतीमिव प्रज्ञाद्यंतीजगतकथंद्रादिवं चद्रगुप्तनृपतेः कर्तुंव्यवस्येत्पृथक्॥२३॥ अपिच आ
स्वादितद्वितद्विरदशोणितशोभामिति पूर्वोक्तिं पठति· चंद· स्वगतं· फलेन सेवादिदं सेविकस्याननं·
नेपथ्ये· कलकलः· चाण· शार्ङ्ग· रव आः ज्ञापतां किमेतत· शिष्यः· तथेति निःक्रम्य· पुनः प्रविश्य· उ
पाध्याय एष राज्ञश्चंद्रगुप्तस्याज्ञया राजापथ्यकारी क्षपणको जीवसिद्धिः सनिकारं नगरात निर्वा
स्यते· चाण· क्षपणक अहह· अथवा अनुभव राजापथ्यकारित्वस्य फलं भोः श्रेष्ठिन् चंदनदास एष
वमपमपथ्यकारिषु तीक्ष्णदंडो राजा तत्क्रियतां पथ्यं सुहृद्वचः समर्थितां राक्षसगृहजनो अनु
भूयतां चिरं विचित्रो राजप्रसादः· चंद· णात्थि मे गेहे अमच्चघरअणो। नेपथ्ये· पुनः कलकलः चा
ण· शार्ङ्गरव· आः ज्ञापतां किमेतत· शिष्यः· तथेति निःक्रम्य पुनः प्रविश्य उपाध्याय अयमपि रा
जापथ्यकार्येव कायस्थः। शकटदासः शूलमारोपयितुं नीयते· चाण· स्वकर्मफलमनुभवतु· भोः

श्रेष्ठिन्नेवमपंराज्ञः पथ्यकारिणितीक्ष्णाद्दंडोनमर्षयिष्यतिराक्षसकलत्रप्रच्छादनेभवतः त
द्रक्षपरकलत्रेणात्मनःकलत्रंजीवितंच· चंद· अज्जकिंमेभअंदावेसिसंतंविगेहेअमच्चरक्ख
सस्सघरअणंणसमप्पेमिकिंउणअसंतं।चाण· चंदनदासएषतेनिश्चयः चंद· वाढं·एसोधीरा
मेणिच्चयो· चाण· स्वगतं।साधुचंदनदाससाधु· सुलभेष्वर्थलाभेषुपरसंवेदनेजने।कइदंदु
ष्करंकुर्यादिदानींशिविनाविना।२४ प्रका· चंदनदास· एषतेनिश्चयः चंद· वाढं· चाण· सक्रो
धं· दुरात्मन्तर्हिवणिक्अनुभूयतांनरपतिक्रोधः।चंद· सज्जोम्हिअणुचिट्ठदुअज्ज
अज्जोअत्तणोअहिआरसरिसं· चाण· शार्ङ्गरवउच्यतामस्मद्वचनात्कालपाशिकोदंडपाशि
कश्चशीघ्रमयंदुष्टवणिङ्निगृह्यतां· अथवातिष्ठतु·उच्यतांदुर्गपालकोविजयपालकः गृही
तगृहसारमेनंसपुत्रकलत्रंसंयम्यतावद्रक्षयावन्मयावृषलायकथ्यतेवृषलएवास्यप्राण

हूरंदंडमाज्ञायपिष्यति·शिष्य·यदाज्ञापयत्युपाध्याय॰ऒष्ठिन्नितरतः·चंदनऋजुऋअऋआऋद्यामि·
स्वगतं·दिष्ट्याआमिन्नकञ्जैणामेविणासोणावुरिसदोमेणः·परिक्रम्यशिष्येणासहनिष्क्रांतः·चाणाक्यः·
सहर्षंहंतलब्धइदानींराक्षसः·कुतः·त्यजत्यप्रियवल्लाणान्यथातस्यापमापदितस्यैवास्यापदिम्रा
णान्नूनंतस्यापिनप्रियाः॥२५॥नेपथ्येकलकलः·चाणा॰शार्ङ्ग॰·रव२प्रविश्यशिष्य॰२उपाध्यायआ
ज्ञापये·चाणाक्यः·किमेषकलकलः·शिष्यः·विभाव्यः·उपाध्यायएषखलुशकटदासंवध्यमानंवध्यभू
मेरादायसमयक्रांतःसिद्धार्थकः·चाणः·स्वगतं·साधुसिद्धार्थककृतः·कार्यारंभः·प्रकाशं·प्रसत्यकि
मपक्रांतः।सक्रोधं·वत्सउच्यतांभागुरायणाःपथात्वरितंसंभावयेति·निष्क्रम्यप्रविश्यचशिष्यः·सवि
षादं·उपाध्यायहाधिक्कष्टमपक्रांतोभागुरायणोपिचाणा·स्वगतं·व्रजतुकार्यसिद्धये·प्रकाशं·सक्रोधमि
व·भद्रउच्यतामस्मद्वचनाद्भद्रभटपुरुषदत्तडिंगरातेवलगुप्तराजसेनहिताक्षविजयवर्माणः॥शीघ्रमनुस्त्य

सगृह्य तां दुरात्मा भागुरायणः शिष्यः तथेति निःक्रम्य पुनः प्रविश्य सविषादं हा धिक्कष्टं ॥ सर्वमेव
तं त्रैं आकुलीभूतं तेपि खलु भद्रभटप्रभृतयः प्रथमतरं उपस्थिवायका तां चोरा स्तुगतं सर्वथा शि
वाः पंथानः संतु अ‍ेकाः वत्स अलं विषादेन पश्य ये याता किमपि प्रवीर्य हृदये पूर्वगता एव ते येति
ष्ठंति भवंतु तेपि गमने कामं प्रकामोद्यमाः । एका केवलमेव साधन विधौ सेना शतेभ्योधिकानंदोन्मू
लन दृष्टवीर्य महिमा बुद्धिस्तु मागान्मम ॥२६॥ उत्थाय आकाशे लक्ष्यं बध्वा एषः दुरात्मनो भद्रप्रभृता
नाहरामि आत्मगतं दुरात्मन राक्षस मत्को दानीं गमिष्यसि एषो हम चिराद्भवंतं ॥ ॥ स्वच्छंदमेकच
रमुज्वलदानशक्तिमुत्सेकिनामदबलेन विगाहमानं । बुध्या निगृह्य वृषलस्य कृते क्रियाया मार
ण्यकं गजमिव प्रगुणी करोमि ॥२७॥ इति निष्क्रांताः सर्वे मुद्रालाभो नाम प्रथमोंकः ततः प्रविश
त्याहितुंडिकः । आहितुंडिकः । जीर्णांतितं तजुत्तिं जहं ष्ठिअमंडलं अहिलिहंति । जें मंतरकवणापरा

तेसप्पनराहिवेउवअरंति॥ १॥ आकाशे· अज्ज किं तुमं भणासि को तुमं त्ति· अज्ज अहं खु आहितुंडि
ओ जिण्णविसो णाम· किं भणासि अहं वि अहिणा खेलिदुं इच्छामि त्ति· अह कदरं उण अज्जो उत्तिं·
उवजीवदि· किं भणासि राअकुलसेवको म्हि त्ति· णं खेलदि एव्व अज्जो अहिणा· कहं विअ मंतोस
हिकुसलो वालग्गाहिहत्थिमेत्तो अरिक्कंतो एसो· पुनराकाशे· अज्ज किं तुमं भणासि किं एदं सु
पेडालसमुग्गए त्ति· अज्ज जीविआए सयादआसथा किं भणासि पेक्खिदुं इच्छामि त्ति· पसीददु
अज्जो अट्ठाणं खु एदं ता जदि कोहूहलं एहि एदस्सिं आवासे दंसेमि किं भणासि एदं खु भट्टिणो अ
मच्चरक्खसस्स गेहं णत्थि अम्हारिसाणं इह पवेसो त्ति ता णाहि गच्छदु अज्जो मम उण जीविआए प
साराण अत्थि इह पवेसो। कहं एसो वि अवक्कंतो· सविस्मयं· म्रू· पस्वगतं· संस्कृतमाश्रित्य·
अहो आश्चर्यं· चाणक्यमतिपरिगृहीतं चंद्रगुप्तमवेक्ष्य विफलमिव राक्षसप्र- यत्नमवगच्छा

मिव लक्षयामि ॥२॥ तदेवमनयोर्बुद्धिशालिनोः सुसचिवयोर्विरोधे संशयितेव नंदकुललक्ष्मीः पतः॰ वि
रुद्धयोर्भृशमिह मंत्रिमुख्ययोर्महावने वनगजयोरिवांतरे । अनिश्चयाद्गजवशयेव भीतया गतागतैर्ध्रुव
मिह खिद्यते श्रिया ॥३॥ तद्यावदमात्यराक्षसं पश्यामि । इति परिक्रम्य स्थितः । ततः प्रविशत्यासनस्थः पुरु
षेणानुगम्यमानस्सचिंतो राक्षसः ।२। सवाष्पं । कष्टं भोः कष्टं वृष्णीनामिव नीतिविक्रमगुणव्यापारशांत
द्विषां नंदानां विपुले कुले कुलेऽकरुणायानीते नियत्या क्षयं चिंतावेशसमाकुलेन मनसा रात्रिंदिवं जा
ग्रतः सैवेयं मम चित्रकर्मरचना भित्तिं विनावर्त्तते ॥४॥ अथ नानेदं विस्मृतभक्तिना न विषयव्यासंगमू
ढात्मना प्राणप्रच्युतिभीरुणा न च मया नात्मप्रतिष्ठार्थिना ॥ अत्यर्थं परदास्यमेत्य निपुणं नीतो मनो
दीयते देवः स्वर्गगतोपि शात्रववधेनाराधितः स्यादिति ॥५॥ आकाशमवलोकयन् सास्त्रं॰ भगवति कम
लालये भृशमगुणज्ञासि ॥ कुतः॰ आनंदहेतुमपि देवमपास्य नंदं सक्तासि किं कथय वैरिणि मौ

येपुत्रोदानांवृराजिशिखगंधगजस्यनागास्तैनैवकिंनवपल्लेप्रलयंगतासि॥६॥ अपिच॰ अनभिजाते॰ पृथि
व्यांकिंदग्धाःप्रथितकुलजाभूमिपतयःपतिंपापेमौर्यंयदसिकुलहीनंवृतवती।प्रकृत्यावाकाशप्रभ
वकुसुमप्रांतचपलापुरंध्रीणांप्रज्ञापुरुषगुणविज्ञानविमुखी॥७॥ अपिच॰ अविनीते॰ तदहमाश्रयो
न्मूलनेनैवत्वामकामांकरोमि। विचिंत्य॰ मयातावत्सुहृत्तमस्यचंदनदासस्यगृहेगृहजनंनिक्षिप्यनगरा
न्निर्गच्छतान्याय्यमनुष्ठितम॰ कुसुः॰ कुसुमपुराभियोगंप्रत्यनुदासीनोराक्षसइतितत्रस्थानामस्माभिः
सहैककार्याणांदेवपादोपजीविनांनोद्यमःशिथिलीभविष्यति।चंद्रगुप्तशरीरमभिद्रोग्धुमस्मत्प्रयु
क्तानांतीक्ष्णरसदायिनामुपसंग्रहार्थंपरकृत्योपजापार्थंचमहताकोशसंचयेनस्थापितःशकट
दासःप्रतिक्षणमरातिवृत्तांतोपलब्धयेतत्संहतिभेदनायचव्यापारिताःसुहृदोजीवसिद्धिप्रभृत
यः॰ तत्किमत्रबहुना॰ इष्टात्मजःसपदिसान्वयएवदेवःशार्दूलपोतमिवयंपरिपोष्यनष्टः।तस्यैवबु

द्धिविशिष्टखेनमिनद्यिमर्मवमीमेवद्यदिनदेवमहद्दृश्यरूपं।८। ततःप्रविशतिकंचुकी॰ कामंनंदमि
वप्रमथ्यजरयाचाणक्यनीत्यायथाधर्मोमौर्यइवक्रमेणनगरेनीतःप्रतिष्ठांमयि। तंसंप्रत्युपचायमान
मनुमेलब्धांतरःसेवयालोभोराक्षसवज्जयाययततेजेतुंनशक्नोतिच॥९॥ परिक्रम्योपसृत्यच॰ इद
ममात्यरक्षसस्यगृहंप्रविशामि। प्रविश्याकुमारोमलयकेतुरमात्यंविज्ञापयतिचिरात्प्रभृत्यार्यःपरित्यक्तो
चितसंस्कारइतिपीड्यतेमेहृदयंयद्यपिसहसास्वामिगुणानशक्यंतेविस्मर्तुंतथापिमद्विज्ञापनामा
नयितुमर्हत्यार्यः इत्याभरणानिप्रदर्श्य इमान्याभरणानिकुमारेणस्वशरीरादवतार्यप्रेषितानिधारयितु
मर्हत्यमात्यः॰ राक्ष॰ आर्यजाजलेविज्ञाप्यतामस्मद्वचनात्कुमारः विस्मृताएवभवद्गुणपक्षपातेनस्वा
मिगुणाः किंतु॰ नतावन्निर्वीर्यैःपरिपरिभवाक्रांतिकृपणैर्वहाम्यंगैरेभिःप्रतनुमपिसंस्काररच
नां।नयावन्निःशेषक्षपितरिपुचक्रस्यनिहितंसुगांगेहेमांकंन्टवरतववसिंहासनमिदं॥१०॥ कंचु॰

मु· लं·
१५
15

अमात्येनेतरिसुलंभमेतत्कुमारस्य· तत्प्रतिमान्यतांकुमारस्यप्रथमः प्रणयः राक्षः आर्यकुमारइव
नातिक्रमणीयवचानोभवानपितदनुष्ठीयतकुमारस्याज्ञाः कंचु· नाद्येनभूषणानिपरिधाप्य स्वस्ति
भवनेसाधयाम्यहं· राक्षः आर्याभिवादयो· कंचु· निष्क्रीतः· राक्षः प्रियंवदकज्ञायतांकोस्मद्दर्शनार्थी
द्वारेतिष्ठति· पुरु· जं अमच्चो आणवेदित्ति· परिक्रम्य· आहितुंडिकंदृष्ट्वा· अज्जकोतुमं· आहितुं· भ
द्द अहंखुआहितुंडिओजिण्णविसोणाम· इच्छेमि अमच्चस्सपुरादोसप्पेहिखेलिदुं· पुरु· चिट्ठजावअ
मच्चस्सणिवेदेमि· राक्षसमुपसृत्य· अमच्च एसोखुसप्पजीवीइच्छदिसप्पंदंसेदुं· राक्षसः· वामाक्षि
स्पंदनंसूचयित्वा· आत्मगतं कथंप्रथममेवसर्पदर्शनं· प्रकाशंप्रियंवदकनमेकौतूहलं सर्पेषुतत्परि
तोष्यविसर्जयैनं· पुरु· तथेतितमुपसृत्य· अज्ज एसोखुदेदंसणेणकज्जेणअमच्चोमच्चोपसादंकरेदिण
उणसप्पदंसणेण· आहि· भद्दमुहविण्णवेहिअमच्चणाकेवलं अहंसप्पजीवीपाउउकवीखुअहं

श्री०
१५

जाजइमे अमच्चो दंसणेण पसादं ण करेदि ता एतं पत्तअं वाचेदु त्ति· पुरु· पत्रं गृहीत्वा राक्षसमुपसृ
त्य· अज्ज एसो खु अमच्चं विस्समेदि ण केवलं अहं सप्पजीवी पाउडकवी खु ता जइमे अमच्चो दंस
णेण पसादं ण करेदि तदो एदं क्खिदाव पत्तअं वाचेदु त्ति· राक्षसः पत्रं गृहीत्वा वाचयति· पाकृएण निरवसे
सं कुसुमरसं अत्तणो कुसलदाए जं गिरेइ भमरो अण्णाणं कुणति तं कज्जं॥११॥ विचिंत्य· स्वगतं·
अपि कुसुमपुरवृत्तान्तज्ञः भवत्प्रणिधिरिति गाथार्थः। कार्यव्यग्रत्वान्मनसः प्रभूतत्वाच्च प्रणिधी
नां विस्मृतमिदानीं स्मृतिरुपलब्धा· व्यक्तमाहितुंडिकछद्मना विराधगुप्तेनानेन भवितव्यं प्रका·
प्रियंवदक प्रवेशयैनं सुकविरेषः श्रोतव्यमस्मात्सुभाषितं· पुरु· तथेत्याहितुंडिकमुपसृत्य· उपस
प्पदु अज्जो· आहितुंडिनाट्येनोपसृत्य विलोक्य सत्त्वतमात्मिस्य· स्वगतं· अये ममात्यराक्षसः एए
षः· वामां बाहुलतां निवेश्य पशिथिलं कंठे निवृत्ताननः स्कंधे दक्षिणया बलान्निहितया प्यंके यं तं

सामुद्धः गाढालिंगनसंगपीडितमुखं यस्योद्यमाशंकिनी मौर्यस्योरसि नाधुनापि कुरुते वामेतरं श्रीः स्तनं ॥१२
।प्रकाशं। जेदु अमच्चो। राक्ष॰ विलोक्य। अये विराध इत्सद्दीक्कनन तु प्ररूढश्मश्रुः ।प्रियंवदक भुजगोपजीविनो
विनोदयितव्यं। तद्विश्रम्यतामितः परिजनेन त्वमपि स्वाधिकारमशून्यं कुरु। पुरुषः। तथेति सपरिजनो नि
ष्क्रांतः। राक्षसः। सखे विराधगुप्त इदमासनमास्यतां। विराधः। नाथ नोपविष्टः। राक्ष॰ निर्वर्ण्य। अये देव
पादपद्मोपजीविनः अवस्थेयमिति रोदिति। विराधः। अलममात्यशोकेन। नातिचिरादमात्यो स्मा
न्पुरातनामवस्थामारोपयिष्यति। राक्षसः। सखे वर्णय कुसुमपुरवृत्तांतं। विराधः। अमात्य विस्तीर्णः
खलु कुसुमपुरवृत्तांतः तत्कुतः प्रभृति वर्णयामि। राक्षसः। सखे चंद्रगुप्तस्यैव तावन्नगरप्रवेशात्प्र
भृति अस्मत्प्रयुक्तैस्तीक्ष्णरसदायिभिः किमनुष्ठितमिति आदितः श्रोतुमिच्छामि। विरा॰ एष कथ
यामि। अस्ति तावच्छकयवनकिरातपकांभोजवाह्लीकप्रभृतिभिः चाणक्यमति परिगृहीतैश्च

द्रंगुप्तपर्वतेश्वरबलैरुदधिभिरिव प्रलयोच्चलितशलिलैः समंतादुपरुद्धं कुसुमपुरं। राक्षसः शस्त्र
माकृष्य ससंभ्रमम्· अयि मयि स्थिते कः कुसुमपुरमुपरोत्स्यति· प्रवीरक· क्षिप्रमिदानीं॥ प्राका
रं परितः धारासनधरैः क्षिप्रं परिक्रम्य तां द्वारेषु द्विरदैः प्रतिद्विपघटाभेदक्षमैः स्थीयतां॥ त्यक्त्वा
मृत्युभयं प्रहर्तुमनसः शत्रोर्बले दुर्बले ते निर्यांतु मया समं सहैकमनसो येषामभीष्टं यशः॥ १३॥ विरा
धः· अमात्य अलमावेगेन वृत्तमिदं वर्ण्यते। राक्षस· निःश्वस्य· कष्टं वृत्तमिदं मया पुनर्ज्ञातं स एवायं काल इति। शस्त्र
मुत्सृज्य· स्यदेवनंद स्मरामि ते राक्षसं प्रति प्रसतिशयं। त्वमत्र से ग्रामकाल। यत्रैषा मेघनीला चरति गजघ
टा राक्षसस्तत्र याया त्हेतत्यारिलवीभः प्लुतितुरगबलं वार्यतां राक्षसेन। पत्तीनां राक्षसस्त्वंनयतु बलमि
ति प्रेषयन्मह्यमाज्ञामज्ञासीः प्रीतियोगात्स्थितमिव नगरे राक्षसानां सहस्रं॥ १४॥ विराधगुप्तः। ततः समं
तादुपरुद्धं कुसुमपुरमवलोक्य बहुदिवसप्रवृत्तमीतमहदुपरोधवैशसमुपरि पौराणां परिवर्त्तमानमस

समानेतस्यामप्यवस्थायांपौरजनापेक्षयासुरंगामेत्यापक्रांतेतपोवनायदेवेसर्वार्थसिद्धौस्वामिविरहाच्छि
थिलीकृतप्रयत्नेषुसुष्मद्बलेषुजपाद्घोषणाव्याघातादिसाहसानुमितेष्वंतर्नगरवासिषुपुनरपिनंदराज्य
प्रत्यानयनायसुरंगयावहिरयितेषुचंद्रगुप्तनिधनायपुष्मत्प्रयुक्तयाविषकन्ययाघातितेतपस्विनिपर्वतेश्व
रे·राक्षसः सखेपश्याश्चर्यं· कर्णेनेनविषांगनेकपुरुषव्यापादिनीरक्षिताहतुंशक्तिरिवार्जुनंवलवतीयाचं
द्रगुप्तंमया॥साविष्णोरिवविष्णुगुप्तहतकस्यात्यंतिकश्रेयसेहैडिंबेयमिवैत्यपर्वतनृपतद्वध्यमेवावधीत्॥
१५॥विरा·अमात्यादैवस्यात्रकामचारः किंक्रियतां॥रा·ततः वि·ततःपितृवधादपक्रांतेकुमारेमलयके
तौविश्वासितेपर्वतकभ्रातरिवैरोचकेप्रकाशितेचंद्रगुप्तस्यनंदभवनप्रवेशेचाणक्यहतकेनाहूयाभिहि
ताःसर्वएवकुसुमपुरनिवासिनःसूत्रधाराः॥यथासांवत्सरिकादेशादद्यार्धरात्रसमयेचंद्रगुप्तस्यनंदभव
नप्रवेशोभविष्यतिततःपूर्वद्वारात्प्रभृतिसंस्क्रियतांराजभवनमिति·ततःसूत्रधारैरभिहितं·आर्यप्रथम

मेवदेवस्यचंद्रगुप्तस्यनंदभवनप्रवेशमुपलभ्यसूत्रधारेणदारुवर्मणाकनकतोरणन्यासादिभिः संस्कारवि
शेषैः संस्कृतं राजभवनद्वारमस्माभिरिदानीमभ्यंतरे संस्कारस्त्रोवृपइति॥ निमतुचितमिति वहिर्गत्वा
सुहृद्धोस्थापनादिनानंदराजप्रसादनततश्चचाणाक्यवटुनाऽनादिष्टेनैवसूत्रधारेणदारुवर्मणासंस्कृ
तंराजभवनद्वारमितिपरितुष्टेनैवमुचितंदारुवर्मणोदाक्ष्यंप्रशस्यामिहि तन्नचिरादस्यदाक्ष्यस्यानुरू
पंफलमधिगमिष्यसिदारुवर्मन्।सख· सोद्वेगं· सखेकुतश्चाणाक्यवटोः परितोषः अफलमनिष्टफलं
वादारुवर्मणः प्रपलमधिगच्छामि।पदनेनबुद्धिमोहादथवाराजभक्तिप्रकर्षान्नियोगकालमप्रताक्ष्य
माणेनजनितश्चाणाक्यवटोश्चेतसिमहान्विकल्पः। ततस्ततः। विरोधः। ततश्चाणाक्यहतकेनानुकूलक्षमव
शादर्द्धरात्रसमयेचंद्रगुप्तस्यनंदभवनप्रवेशोभविष्यतीतिशिल्पिनः पौरांश्चगृहीतोर्थान्कृत्वास्मिन्नेववक्ष
णेपर्वतेश्वरभ्रातरंवैरोचकमेकासनेचंद्रगुप्तेनसहोपवेश्यकृतः पृथ्वीराजविभागः।राध· किंवान्त्रतिस्र

ष्टःपर्वतकभ्रात्रेवैरोचकायपूर्वप्रतिश्रुतोराज्यार्द्धविभागः।विराधः।अथकिं।राक्षसः।स्वगतं।नियतमतिधूर्तेन
चाणक्यवटुनातस्यापितपस्विनःकमप्युपांशुवधमाकलय्यपर्वतेश्वरविनाशेनजनितमयशः।प्रमार्ष्टुमेषा
लोकप्रसिद्धिरुपचिता।प्रका०ततः।विराधः।ततःप्रथममेवप्रकाशितेरात्रौचंद्रगुप्तस्यनंदभवनप्रवे
शेकृताभिषेकेकिलवैरोचकेविमलमुक्तामणिपरिक्षेपाविरचितचित्रपटमयवारबाणप्रच्छादितश
रीरेमणिमयमुकुटनिविडनियमितरुचिरतरमौलौसुरभिकुसुमदामवैकक्ष्यावभासितविपुलवक्षःस्थ
लेपरिचिततमैरप्यनभिज्ञायमानाकृतौचाणक्यहतकादेशाच्चंद्रगुप्तोपवाह्यांचंद्रलेखांनामगजवधू
मारूढेचंद्रगुप्तानुयायिनाराजलोकेनानुगम्यमानेदेवस्यनंदस्यभवनंप्रविशतियुष्मत्प्रयुक्तेनदारुवर्म
णासूत्रधारेणचंद्रगुप्तोयमितिमत्वातस्योपरिपातनायसज्जीकृतंयंत्रतोरणं।अत्रांतरेवहिर्निगृहीतवा
हनेषुस्थितेषुचंद्रगुप्तानुयायिषुनृपेषुयुष्मत्प्रयुक्तेनैवचंद्रगुप्तनिषादिनावर्वरकेणकनकदंडिका

तन्निर्हितांअसिपुत्रिकामाकृष्टुकामेनावलंवितकरेणकनकशृंखलावलंविनीकनकंयष्टिका॥ राक्षसः॥ उ
भयोरप्यस्थानेयत्नः॥ ॥विराधः॥ अथजघनाभिघातमुत्प्रेक्षमाणागजवध्यकारिजवनतयागत्वातरमारू
ढवती। प्रथमगात्मनुरोधप्रत्याकलितमुक्तेनप्रभ्रष्टलक्ष्यंतत्पातितोरणेनआकृष्टकृपाणीव्यग्रपाणिरना
सादयल्लेचंद्रगुप्ताशयावैरोचकंहतस्तपस्वीवर्वरकः। ततोदारुवर्मणायंत्रतोरणस्थलमारूढेनयंत्रघ
टनहेतुंलोहकीलकमादायहस्तिनीगतएवहतस्तपस्वीविरोचकः। राक्ष॰ कष्टमनर्थद्वयमापतितं। नहत
चंद्रगुप्तोहतौवैरोचकवर्वरौदैवेन। अथसूत्रधारोदारुवर्माकथं। विरा॰ वैरोचकपुरःसरेणपदातिलोके
नैवलोष्टघातंहतः। राक्ष॰ सास्रं॰ कष्टमहोवत्सलेनसुहृदादारुवर्मणाविप्रयुक्ताःस्मः। अथतत्रत्येनभि
षजाभयदत्तेनकिमनुष्ठितं। विरा॰ सर्वमनुष्ठितं॰ राक्ष॰ सहर्षं॰ किंहतोदुरात्माचंद्रगुप्तः। विरा॰ अमात्य
दैवान्नहतः। राक्ष॰ सविषादं॰ तत्किमिदानींकथयसिसर्वमनुष्ठितमिति। विरा॰ अमात्यकल्पितमने

मु· रा·
१९
19

नयोगचूर्णमिश्रितमौषधंचंद्रगुप्तायतत्प्रत्यक्षीकुर्वताचाणक्यहतकेनकनकभाजनेवर्णांतरमुपलभ्याभि
हितश्चंद्रगुप्तः वृषलसविषमिदमौषधंनपातव्यं।राक्षसः शठः खल्वसौवटुः।अथसवैद्यःकथं।विरा: तदे
वौषधंपायितोमृतश्च।राक्षसः।।सविषादं।अहोमहान्विज्ञानराशिरुपरतः।अथतस्यशयनाधिकृत
स्यप्रमोदकस्यकिंवृत्तं।विराधः।यदितरेषां।राक्ष·सोद्वेगं·कथमिव।विरा·सखलुमूर्खस्तत्पुष्याभिरस्तु
ष्टंमहांतमर्थराशिमवाप्यमहताव्ययेनोपभोक्तुमारब्धवान्।ततः कुतोभूयान्धनागमइतिपृष्टश्चप्रमा
यदावाक्यभेदान्बहून्गमततदाचाणक्यहतकेनविचित्रवधेनव्यापादितः।राक्षसः।कथमत्रापिदैवेनो
पहतावयं।अथशयितस्यचंद्रगुप्तस्यशरीरमभिहन्तुमस्मत्प्रयुक्तानांराजगृहस्यांतर्भित्तिसुरंगामेत्यप्रथ
ममेवानवसतांबीभत्सकादीनांकोवावृत्तांतः।विरा·अमात्यदारुणोवृत्तांतोस्ति।रा·सावेगं·कथंदारु
णोवृत्तांतः न खलुविदितास्तेतत्रनिवसंतश्चाणक्यहतकेन विरा·अमात्यअथकिं।। ॥मूलमधिकाम

श्री·
१९

रं ॥ प्राक्चंद्रगुप्तप्रवेशाच्छयनगृहं प्रविष्टमात्रेणैव निपुणमवलोकयता दुरात्मना चाणक्यहतकेन कस्मा
च्चिद्भित्तिच्छिद्रादुद्गृहीतभक्तावयवान्निष्क्रामंतीं पिपीलिकापंक्तिमवलोक्य पुरुषगर्भमेतद्गृहमिति
गृहीतार्थेन दाहितं तच्छयनगृहं तस्मिंश्च दह्यमाने धूमावरुद्धदृष्टयः प्रथममभिहितनिर्गमेन मार्ग
मनधिगम्य द्वारं सर्व एव धीभत्सादयो ज्वलनमुपगम्य तत्रैव नष्टाः ॥ राक्षसः सास्रं कष्टं भोः कष्टं सखे पश्य
दैवसंपदं दुरात्मनश्चंद्रगुप्तहतकस्य । कुतः । कन्या तस्य वधाय या विषमयी गूढं प्रयुक्ता मया दैवात्पर्वत
कस्तया स निहतो यस्तस्य राज्यार्द्धहृत् । ये शस्त्रेषु च प्रणिहितास्तैरेव ते घातिता मौर्यस्यैव फलंति पश्य
विविधश्रेयांसि मन्नीतयः ॥ १६ ॥ विरा० अमात्य तथापि खलु आरब्धमपरित्याज्यमेव पश्य । प्रारभ्यते
न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्नविहता विरमंति मध्याः । विघ्नैः पुनः पुनरपि प्रतिहन्यमा
नाः प्रारब्धमुत्तमगुणा न परित्यजंति ॥ १७ ॥ अपि च । किं शेषस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष य

ल्किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः। किं त्वंगीकृतमुत्सृजन्कृपणवच्छ्लाघ्यो जनो लज्ज
ते निर्व्यूढं प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतं॥१८॥ राक्षसः। सखे प्रारब्धमपरित्याज्यमिति प्रत्य
क्षमेवैतत्भवतां। ततः। विरा॰ ततः प्रभृति चंद्रगुप्तशरीरे सह स्वगुणमप्रमत्तेश्चाणक्यहतकः। एभ्य
एतदीदृशं भवतीत्यन्विष्य निगृहीतवान्पुनर्निवासिनो युष्मदीयानाप्तपुरुषान्। राक्ष॰ सोद्वेगं॰ क
थय कथय के के निगृहीताः। विरा॰ प्रथमं तावत्क्षपणको जीवसिद्धिः सनिकारं नगरान्निर्वासितः।
राक्ष॰ स्वगतं॰ एतत्तावत्सह्यं न निष्परिग्रहं स्थानभ्रंशः पीडयिष्यति। प्रकाशं च परस्य कमपराधमु
द्दिश्य निर्वासितः। विरा॰ एष राक्षसप्रयुक्तया विषकन्यया पर्वतेश्वरं व्यापादितवानिति। राक्ष॰ स्वग॰
साधु कौटिल्य साधु॰ स्वस्मिन्नयहतमयशः पातितमस्मासु घातितोर्द्धराज्यहरः। एकमपि नीतिवी
जं बहुफलतामेति यस्य तव॥१९॥ प्रका॰ ततः २ तवरा॰ ततश्चंद्रगुप्तशरीरमभिद्रोग्धुमनेन व्यापारिता

दारुवर्मादय इति नगरे प्रख्याप्य शकटदासः शूलमारोपितः। राक्षः सास्रं हे सखे शकटदास अयुक्त
रूपस्त्वयापमीदृशो मृत्युः। अथवा स्वाम्यर्थमुपरतो न शोच्यस्त्वं वयमत्र शोच्याः। ये नंदकुलविनाशि
पि जीवितुमिच्छामः। विरा· अमात्य स्वाम्यर्थ एव साधयितव्य इति प्रयतसे। राक्ष· सखे· अस्माभि
रमुमेवार्थमालंव्य नाजिजीविषा। परलोकगतो देवः कृतघ्नैर्नानुगम्यते॥२०॥ कथ्यतामपरस्यापि सुहृ
द्व्यसनश्रवणे सज्जोऽस्मि। विरा· एतदुपलभ्य सौहार्दादपवाहितममात्यकलत्रं। राक्ष· क्रूरस्य चाण
क्यवटोर्विरुद्धमायुक्तमनुष्ठितं तेन। विरा· अमात्य· ननु युक्ततरः सुहृद्द्रोहः। राक्ष· ततः। विरा· ततो
याच्यमानेनानेनसमर्पितममात्यकलत्रं यदा तदाऽतिकुपितेन चाणक्यवटुना। राक्ष· मा हैवं न ख
लु व्यापादितः। विरा· नहि गृहीतगृहसारः सपुत्रकलत्रो बंधनागारे निक्षिप्तः। राक्ष· सखेतत्किंप
रितुष्टः कथयास्यपवाहितं राक्षसकलत्रमिति ननु वक्तव्यं संयमितः सपुत्रकलत्रो राक्षस इति। प्र

मु·रां·
२१
21

विश्यपुरुषः ऐ दु अमच्चो एसो खु सअडदासो पडिदार भूमिं उचट्ठिदो।राक्ष·भद्र अपि सत्यं·पुरु·किं
अलिअं अमच्च पारेसु विण्णिवेमि।राक्ष·सखे विराधगुप्त कथमेतत्।विरा·अमात्यस्यादवं·यतो भव्यं
रक्षति भवितव्यता।रा·प्रियंवदक किमद्यापि चिरयसि क्षिप्रं प्रवेशयैनं·पुरु·तथेति निष्क्रांतः प्र
विश्य सिद्धार्थकः।शकटदासश्च रस्वगः दृष्ट्वा मौर्यमिव प्रतिष्ठितपदं क्रमं धूरिव्यास्खलेत लक्ष्मी
मिव चेतनाप्रमथिनं मूर्ध्नीव बंध्यस्रजं।श्रुत्वा स्वाम्यपरोपरोद्द्विषमानाघाते तूर्यस्वनान्न ध्वस्तं प्रथ
माभिपातकठिनं पतन्यदीपं मनः।२१।उपसृत्यावलोक्य चा।सहर्षं अपमात्यराक्षसस्तिष्ठति।य एषः
।अक्षीणभक्तिः क्षीणापि नंदस्वाम्यर्थमुद्वहन्।पृथिव्यां स्वामिभक्तानां प्रमाणे परमे स्थितः॥२२॥
उपसृत्य जयत्वमात्यः।राक्ष·विलोक्य·सहर्षं सखे शकटदास दिष्ट्या कौटिल्यगोचरगतोपि त्वं दृष्टोसि
तत्परिष्वजस्व मां।ताक·तथा करोति।राक्ष·चिरं परिष्वज्य इदमासनमास्यतां।शक·नाद्येनोपविष्टः।

श्री॰
२१

राक्ष· सखे शकटदास अथ कार्यईदृशस्य हृदयानंदस्य हेतुः। शक· सिद्धार्थकं निर्दिश्य· अनेन प्रियसु
हृदा सिद्धार्थकेन घातकान्विद्राव्य वध्यस्थानादपहृतोस्मि। राक्ष· सहर्षं· भद्र सिद्धार्थक किं पर्या
प्तमिदमस्य प्रियस्य तथापि गृह्यतां· स्वगात्रादवतार्य भूषणानि प्रयच्छति सिद्धा· गृहीत्वा पादयोर्नि
पत्य· स्वगतं· अअं खु अज्जोपदेसो ता दाव तह करिस्सं। प्रकाशं· अमच्च एत्थ पढमप्पविट्ठस्स णत्थि
को वि परिचिदो। जत्थ इमं अमच्चस्स पसादं णिक्खिविअ णिव्वुदो भविस्सं। ता इच्छेमि इमाए मुद्दाए
मुद्दिदुं अमच्चस्स एव्व भंडारे ठाविदुं जदा मे पओअणं तदा गेह्विस्सं। राक्ष· भद्र को दोषः शकट
दास एवं क्रियतां· शकट· यथाज्ञापयत्यमात्यः मुद्रां विलोक्य जनांतिके अमात्य भवन्नामांकितेयं
मुद्रा· राक्षसः विलोक्य· आत्म· सत्यं नगरान्निःक्रामतो मम हस्तात् ब्राह्मण्या उत्कंठाविनोदार्थं गृही
ता तत्कथमस्य हस्तमुपागता· प्रका· भद्र सिद्धार्थक कुतस्त्वयोयमधिगता सिद्धा· अत्थि कुसु

मधुरमणिआरसेट्ठी चंदनदासो णाम। तस्स गेहदुवारपडिसरपडिता मए आसादिदा। राक्ष॰ युज्यते। सिद्धा॰
अमच्च एत्थ किं जुज्जइ। राक्ष॰ भद्र यन्महाधनानां गृहे पतितस्यैवंविधस्योपलब्धिरिति। शकट॰ सखे
सिद्धार्थक अमात्यनामांकितेयं मुद्रा तदितो बहुतरेणार्थेन भवन्तममात्यस्तोषयिष्यति दीयतामेषा॥
सिद्धा॰ अज्ज णं पसादो एसो। जं इमाए मुद्दाए अमच्चो परिग्गहं करेदि। इति मुद्रामर्पयति। राक्षसः सखे
शकटदासानयैव मुद्रया स्वाधिकारे व्यवहर्त्तव्यं भवता। शकट॰ यदाज्ञापयत्यमात्यः। सिद्धा॰ अमच्च विस्स
वेमि। राक्ष॰ ब्रूहि विश्रब्धं। सिद्धा॰ जाणादि एव्व अमच्चो जह चाणक्कवडुकस्स विप्पियं कदुअ णत्थि
उण पाडलीउत्ते पवेसो त्ति। इच्छेमि अहं अमच्च चलणे एव्व सुस्सूसिदुं। राक्ष॰ भद्र प्रियं नः किंतु त्वद
भिप्रायापरिज्ञानांतादितोयमेस्मरं तु नयस्तदेवं क्रियतां। सिद्धा॰ महंतं अनुग्गहिदो म्हि। राक्ष॰ शक
टदास विश्रामय सिद्धार्थकं। शकट॰ तथेति सिद्धार्थकेन सह निष्क्रांतः। राक्ष॰ सखे विराधगुप्त वर्णय वृत्त

शेषं। अपि त्वमंते स्मदुपजापं चंद्रगुप्तप्रकृतयः। विरा:। अमात्य बाढं त्वमतेयथाप्रकाशमनुगच्छत्येव
।राक्ष। सखे किं तत्र प्रकाशं। विरा। इदं तत्र प्रकाशं। यन्मलयकेतोरपक्रमणात्प्रभृति कुपितश्चंद्रगुप्त
श्चाणक्ये ऽपरीति। चाणक्योऽथ तिजितकाशितयाऽसहमानश्चंद्रगुप्तं तैस्तैराज्ञाभंगैश्चंद्रगुप्तस्य चेतः
पीडामुपचिनोतीत्यमप्यममानुभावः। राक्ष। सहर्षं। सखे विराधगुप्त गच्छ त्वमनेनैवाहितुंडिकच्छद्मना
कुसुमपुरं तत्र मे प्रियसुहृद्वैतालिकव्यंजनः कलशो नाम प्रतिवसति स त्वया मद्वचनाद्वाच्यः। यथा चाण
क्येन क्रियमाणेष्वाज्ञाभंगेषु चंद्रगुप्तः समुत्तेजनसमर्थैः श्लोकैरूपश्लो·कयितव्यः। कार्यं चातिनिभृ
तं करभकहस्तेनु संदेष्टव्यमिति। विराधः यदाज्ञापयत्यमात्य इति निष्क्रांतः। प्रविश्य पुरुषः। अमच्च प
सो खु सअडदासो विण्णवेदि। एदे खु तिण्णि अलंकारसंजोआ विकीअंति ता पच्चक्खीकरेदु अम
च्चो। राक्ष। विलोक्य। अहो महार्घाण्याभरणानि। भद्र उच्यतामस्मद्वचनाच्छकटदासः परितोष्य वि

केतार गृह्यतामिति। पुरु। तथेति निष्क्रांतः। राक्ष। यावदहमपि कुसुमपुराय करभकं प्रेषयामि उत्थाय· अ
पि नाम दुरात्मनश्चाणाक्याच्चंद्रगुप्तो भिद्येत· अथासिद्धमेव नः समीहितं पश्यामि। कुतः· मौर्यस्तेज
सि सर्वभूतलभुजामाज्ञायको वर्त्तते चाणक्योपि मदाश्रयादयमभूद्राजेति जातस्मयः। राज्यप्राप्तिकृ
तार्थमेकमपरं तीर्णप्रतिज्ञार्णवं सौहार्दात्कृतकृत्यतैव नियतं लब्धांतरा भेत्स्यति॥२२॥ ॥इति राक्ष
सविचारो नाम द्वितीयोंकः॥२॥ ततः प्रविशति कंचुकी २ सनिर्वेदं रूपादीन्विषयान्निरूप्य करणैर्ये
रात्मलाभस्त्वया लब्धस्तेष्वपि चक्षुरादिषु हताः स्वार्थावबोधक्रिया। अंगानि प्रसभं त्यजंति पटुतामा
ज्ञाविधेयानि ते न्यस्तं मूर्ध्नि पदं तवैव जरया तृष्णे मुधा ताम्यसि॥१॥ परिक्रम्याकाशे भो भो सुगांगप्रासा
दाधिकृताः पुरुषाः एष सुगृहीतनामा देवश्चंद्रगुप्तो भवतः समाज्ञापयति प्रवृत्तकौमुदीमहोत्सवरमणी
यं कुसुमपुरमवलोकयितुमिच्छामि· तत्संस्क्रियंतामस्मद्दर्शनयोग्याः सुगांगप्रासादोपरिभूमय इति।

पुनराकाशे किंब्रूथ आर्य किमविदितएवायंदेवस्यकौमुदीमहोत्सवप्रतिषेधइति। आः दैवोपहतकाः
किमनेनवःसद्यःप्राणहरेणकथापोद्घातेन। शीघ्रमिदानीं। आलिंगंतुगृहीतधूपसुरभीस्तंभान्नि
नद्धस्रजःसंपूर्णेंदुमयूखसंहतिरुचांसच्चामराणांश्रियः। सिंहांकासनधारणाच्चसुचिरंसंजातमू
र्छामिवछिद्रैश्चंदनवारिणासकुसुमःसेकोनुगृह्णातुगं॥२॥ किंब्रूथ। आर्यइदमनुष्ठीयतेदेवस्यशा
सनमिति। भद्रास्त्वरध्वमयमागतएवदेवश्चंद्रगुप्तः। यएषः। स्तुविश्रेण्येरंगैःपथिषुविषमेष्वप्यचल
ताचिरंधुर्यश्रोणीगुरुरपियास्याद्गुरुत्वेण। धुरंतामेवोच्चैर्नववयसिवोढुंव्यवसितोमनस्वीदम्यत्वात्स्ख
लतिचनदुःखंवहतिच॥३॥ नेपथ्ये। इतइतोदेवः। ततःप्रविशतिराजाप्रतीहारीच। राजा। स्वगतं
॥ राज्यंहिनामराजधर्मानुवृत्तिपरस्यनृपतेर्महदप्रीतिस्थानं। कुतः। परार्थानुष्ठानैरदपतिनयंस्वार्थ
परतापरित्यक्तस्वार्थोनियतमयथार्थःक्षितिपतिः। परार्थश्चेत्स्वार्थादभिमहपरोहंतपरवान्परायत्तः

प्रीतेः कथमिव रसं वेत्ति पुरुषः ॥४॥ अपि च। दुराराध्या हि राजलक्ष्मीरात्मवद्भिरपि राजभिः। तीक्ष्णादुद्वि
जते मृदौ परिभवत्रासान्न संतिष्ठते मूर्खं द्वेष्टि न गच्छति प्रणयिताम त्यंतविद्वत्स्वपि। शूरेभ्योप्यधिकं
बिभेत्युपहसत्येकांतभीरूनहो श्रीर्लब्धप्रसरेव वेशवनिता दुःखोपचर्या भृशं ॥५॥ अन्यच्च। कृत
ककलहं कृत्वा स्वतंत्रेण किंचित्कालांतरं व्यवहर्त्तव्यमित्यार्यादेशः स च कथमपि मया पातकमिवा
भ्युपगतः। अथवा शश्वदार्योपदेशंसत्क्रियमाणमतपः सदैव स्वतंत्रा वयं। कुतः। इह हि विरचयन्सा
ध्वीं शिष्यः क्रियां न निवार्यते त्यजति तु यदा मार्गं मोहात्तदा गुरुरंकुशः। विनयरुचयस्तस्मात्संतः
सदैव निरंकुशाः परतरमतः स्वातंत्र्येभ्यो। वयं हि पराङ्मुखाः ॥६॥ प्रकाशं। आर्य वैहीनरे सुगांग
मार्गमादेशय। कंचुकी। इत इतो देवः। नाट्येन परिक्रम्य। अयं सुगांगप्रासादः। शनैः शनैरारोहतु देवः। रा
जा। नाट्येनारुह्य दिशोवलोक्य। अहो शरत्समयसंभृतशोभानां दिशामतिरमणीयता। कुतः। शा

नैःश्यानीभूताःसितजलधरच्छेदपुलिनाःसंपतादाकीर्णाःकलविरुतिभिःसारसकुलैःचिता
श्चित्राकारैर्निशि विकचनक्षत्रकुमुदैर्नभस्तः स्पंदते सरित इव दीर्घा दश दिशः ॥७॥ अपि च·
अपामुद्धृत्तानां निजमुपदिशन्त्या स्थितिपदं दधत्या शालीनामवनतिमुदारं सति फले। मयूराणामु
ग्रं विषमिव हरन्त्या मुदमहो कृतः कृत्स्नस्यापि विनयः लोकस्य - रदा ॥८॥ इमामपि· भर्त्तुस्तथा
कलुषितां बहुवल्लभस्य मार्गे कथंचिदवतार्य तनूभवन्तीं। सर्वात्मना रतिकथाचतुरेव दूती गंगां
शरन्नयति सिंधुपतिं प्रसन्नां ॥९॥ समन्तादवलोक्य· अये कथमप्रवृत्तकौमुदीमहोत्सवं कु
सुमपुरं· आर्य वैहीनरे अथास्मद्वचनाद्घोषितः कुसुमपुरे कौमुदीमहोत्सवः· कंचु· अथ
किं। राजाः तत्किं न गृहीतमस्मद्वचनं पौरैः। कंचुकी कर्णौ पिधाय· शांतं पापं· पृथिव्यामस्ख
लितपूर्वं देवस्य शासनं कथं पौरेषु स्खलिष्यति· राजा· तत्कथमप्रवृत्तकौमुदीमहो

मु॰ लं॰
२५

त्सवमद्यापि पुरं धूर्तैरन्वीयमानाः स्फुटचतुरकथाकोविदैर्वेशनार्यो नालंकुर्वंति रथ्याः स्वथजघनभराक्रांतिमंदैः प्रपातैः। अन्योन्यं स्पर्द्धमाना न च गृहविभवैः स्वामिनो मुक्तशंकाः शाकस्त्रीभिर्भजंते विधिमभिलषितं पावनं पौरमुख्याः॥१०॥ कंचुकी॰ एवमेवैतत्। राजाः किमेतत् कंचु॰ देव इदं॰ राजा॰ स्फुटं कथय॰ कंचु॰ प्रतिषिद्धः कौमुदीमहोत्सवः। राजाः सक्रोधं आः केन॰ कंचु॰ देवेनातः परं विज्ञापयितुं शक्यं॰ राजा॰ न खल्वार्यचाणक्येनापहृतः प्रेक्षकाणामतिशयरमणीयश्चक्षुषो विषयः कंचु॰ देव कोन्यो जीवितकामो देवस्य शासनमतिवर्तेत॰ राजा॰ सक्रोधं॰ शोणोत्तरे उपवेष्टुमिच्छामि। प्रती॰ देव एदं सिंहासणं। राजा। नाधुनोपविश्य॰ आर्यवैहीनरे अकृतकृत्यांतरं आर्यचाणक्यं द्रष्टुमिच्छामि। कंचु॰ यदाज्ञापयति देव इति निःक्रांतः। ततः प्रविशत्यासनस्थः स्वभवनगतः कोपानुविद्धां चिंतां नाटयन् चाणक्यः॰ चाण॰ कथं स्पर्द्धते मया सह दुरात्मा राक्षसः। कृतागाः कौटिल्यो भुजग इव निर्यायनगराद्यथा नंदान्हत्वा नृपति

श्री॰
२५

मकरोन्मौर्यवृषलं।तथाहं मौर्यद्रोः श्रियमपहरामीतिकृतधीः प्रकर्षमद्दुरतिशापितुमेषव्यवसि
तः॥११॥आकाशेलक्ष्यंबध्वा·राक्षसरविरम्यतामस्मादुर्व्यसनात·उत्सिक्तः कुसचिवदृष्टराज्यभा
रोनैदोसोनभवतिचंद्रगुप्तएषः।चाणक्यस्त्वमपिचनैवकेवलंतेसाधुम्मैमदनुकृतेः प्रधानवैरं॥१२॥
विचिंत्य·अथवानातमात्रमत्रवस्तुनिमयामनः खेदयितव्यं·कुतः·मद्भृत्यैः किलसोपिपर्वतसुतोव्या
प्तः प्रविष्टांतरैरुपुच्छाः स्वनियोगसाधनविधौसिद्धार्थकाद्याः स्पशाः।कृत्वासंप्रतिकैतवेनकलहंमौ
र्येंदुनाराक्षसंभेत्स्यामिस्वमतेनभेदकुशलस्त्वेषः प्रातीयंद्विषः॥१३॥प्रविश्यकंचुकी·कष्टंखलुसेवा·
भेत्तव्यन्नृपतेस्ततः सचिवतोराज्ञस्ततोवल्लभाहन्येभ्यश्चवसंतिपेस्यभवनेलब्धप्रसादाविदाः।दैन्या
दुन्मुखदर्शनापलपनैः पिंडार्थमापसातः सेवांलाघवकारिणींकृतधियः स्थानेस्ववृत्तिंविदुः॥१४॥
परिक्रम्यावलोक्यच·इदमार्यचाणक्यगृहंयावत्प्रविशामि।प्रविश्यावलोक्यच·अहोराजाधिराज

मु॰ लं॰
२६
२०

मंत्रिणो विभूतिः। तथाहि॰ उपलाशकलमेततभेदकं गामयानां वडाभिरूपहृतानां वर्हिषां स्तूयमेतत। शरण
मपि समिद्भिः शुष्यमाणाभिराभिर्विमलितपटलांतं दृश्यते जीर्णकुड्यं॥१५॥ तत्स्थाने खल्वस्य वृषलो
घश्चंद्रगुप्तं इति। कुतः। स्तुवंति श्रांतास्याः क्षितिपतिरभूतैरपि गुणैः प्रवाचः कार्पण्याद्यदवितथवा
चोपि पुरुषाः। प्रभावस्तृष्णायाः स खलु सकलस्स्यादितरथा निरीहाणामीशस्तृणमिव ततिरस्का
रविषयः॥१६॥ सभयं॰ अये तदयमार्यचाणक्यस्तिष्ठति। योनंदमौर्यनृपयोः परिभूय लोकमस्तोदया
वदिशदप्रतिभिन्नकालं। पर्यायपातितहिमोष्णमसर्वगामि धाम्नातिशाययति धाम सहस्रधाम्नः॥१७
जानुभ्यां भूमौ निपत्य जयत्वार्यः। चाण॰ वैहीनरे किमागमनप्रयोजनं। कंचु॰ आर्यप्रणामसंभ्रमोच्च
लितभूमिपालमौलिमालामाणिक्यशकलशिखापिशंगीकृतपादपद्मयुगलः सुगृहीतनामधे
यो देवश्चंद्रगुप्त आर्यं शिरसा प्रणम्य विज्ञापयति॰ अकृतक्रियांतरायमार्यं द्रष्टुमिच्छामीति। चा

श्री॰
२६

ण· वृषलो मां द्रष्टुमिच्छति। वेहानरेन खलु वृषलश्रवणपथं गतो यं मत्कृतः कौमुदीमहोत्सवप्रतिषेधः
।कंचु· आर्य अथ किं। चाण· सक्रोधं· आः केन कथितं कंचु· सभयं· प्रसीदत्वार्यः। स्वयमेव सुगांगप्रासा
दगतेन देवेनालोकितमप्रवृत्तमहोत्सवं पुरं। चाण· कोपरिग्रहेषपक्षपातः· अथ क्व वृषलः। कंचु· भ
यनाटयन्· आर्य सुगांगगतेन देवेनाहमार्यमूलं प्रेषितः चाण· उत्थाय· गांगमार्गमादेशय· कंचु· भयं
नाटयन्· ददतः आर्यः· उभौ परिक्रामतः कंचु· एष सुगांगप्रासादः शनैरारोहत्वार्यः। चाण· नाट्येनाव
रुह्यावलोक्य च· अपे सिंहासनमाध्यास्ते वृषः· साधु· नंदैर्वियुक्तमनपेक्षितराजराजैरध्यासितं च वृष
लेन वृषेण राज्ञां। सिंहासनं सदृशपार्थिवसंगतं च प्रीतिं परां प्रगुणयंति गुणा ममैते॥१८॥ उपसृत्य·
विजयतां वृषलः· राजा· आसनादुत्थाय आर्य चंद्रगुप्तः प्रणमतीति पादयोः पतति। चाण· पाणौ गृहीत्वा·
उत्तिष्ठ वत्स॥ आशैलेंद्राच्छिलांतः स्खलितसुरनदीशीकरासारशीतात्तीरांतान्नैकरागस्फुरितमा

मु·लं·
२७
27

णिरूढो दक्षिणस्याणीवस्या आगसागत्य भीतिप्रणतनृपशतैः शश्वदेवं क्रियंतां चूडारत्नांशुगर्भास्तव
चरणयुगस्यांगुलीरन्ध्रभागाः १९ राजा· आर्यप्रसादादनुभूयत एव सर्वं तदुपविशत्वार्यः· उभौ यथोचि
तमुपविष्टौ· चाण: वृषल वयं किमर्थमाहूताः राजा: आर्यस्य दर्शनेन आत्मानमनुग्राहयितुं· चाण·
सस्मितं कृत्वा· उपालब्धं तर्हि वयमाहूताः· राजा· शान्तं पापं २ नहि २ विज्ञापयितुं· चाण· यद्येवं तर्हि वि
ज्ञापनीयानामवश्यं शिष्याणां स्वैरं रुचेयो नान निरोद्धव्याः। राजा: एवमेतत् नेकः संदेहः किंतु न कदाचि
दार्यस्य निष्प्रयोजना प्रवृत्तिरित्यस्ति नः प्रश्नावकाशः· चाण: वृषल सम्यग्गृहीतवानसि न प्रयो
जनमंतरा चाणक्यः स्वप्नेपि चेष्टत इति राजा· आर्य अत एव शुश्रूषा मां मुखरयति· चाणक्यः· वृषल
श्रूयतां· इह खल्वर्थशास्त्रकारास्त्रिविधां सिद्धिमुपवर्णयंति· राजायत्तां सचिवायत्तां उभयायत्तां
चेति। ततः सचिवायत्तसिद्धेस्तव किं प्रयोजनान्वेषणेन यतो वयमेवात्र नियुक्ता वेत्स्यामः· राजा:

श्री०
२७

सकोपंमुखंपरावर्त्तयति·नेपथ्येवैतालिकौपठतः·आकाशकाशपुष्पच्छविमभिभवताभस्मनाशुक्लयन्तीं
ताशीतांशोरंशुजालैर्ज्जलधरमलिनांक्लिश्नतीकृत्तिमैभीं।कापालीमुद्वहन्तीस्रजमिवधवलांकौमु
दीमित्यपूर्व्वाहास्यश्रीराजहंसीहरतुतनुरिवक्लेशमेशाशशाङ्कः।२०।अत्रापिच·प्रसत्तोन्मेषविद्धा
णामनभिमुखीरत्नदीपप्रभाणामात्मव्यापारगुर्वीजनितजललवाजृंभितैःसांगभंगैः।नागाङ्कंमोक्तु
मिच्छोःशयनमुरुफणाचक्रवालोपधानंनिद्राच्छेदाभिताम्राचिरमवतुहरेर्दृष्टिराकेकराक्षः।२१।इति
यःसत्वोत्कर्षस्यधात्रानिधयइवकृताःकेपिकस्यापिहेतोर्ज्जेतारःस्वेनधाम्नामदसलिलमुचां
नागयूथेश्वराणां।दंष्ट्राभंगमृगाणामधिपतयइवव्यक्तमानावलेपानाज्ञाभंगंसहन्तेनृवरनृपतय
स्त्वादृशाःसार्वभौमाः।२२।अपिच·भूषणाद्युपयोगेनप्रभुर्भवतिनःप्रभुः।परैरपरिभूताज्ञस्त्वमिवप्र
भुरुच्यते।।२३।।चारणः·स्वगतं·प्रथमंतावतपिशितदेवतास्कातिरूपेणप्रवृत्तेशारद्गुणप्रख्यापन

मिदमपरंकिमितिनावधारयामि।विचिंत्य·आः ज्ञातं·राक्षसस्यायंप्रयोगः दुरात्मनराक्षसदृश्यसेभोःज्ञा
गर्त्तिखलुकौटिल्यः।राजा·आर्यवैहीनरे आभ्यांवैतालिकाभ्यांसुवर्णशतसहस्रंदापय।कं
चु·यदाज्ञापयतिदेवइत्युत्थायपरिक्रामति।चाण·सक्रोधं·वैहीनरेतिष्ठनगंतव्यं वृषलकिमय
मस्थानेमहानर्थोत्सर्गः।राजा·सकोपं·आर्येणैवंसर्वत्रनिरुद्धचेष्टाप्रसरस्यमेबंधनमिवराज्यं
नराज्यमिदं।चाण·वृषलस्वयमनभियुक्तानांराज्ञामेतेदोषाः संभवंतितद्यदिनसहसेततःस्वय
मभियुज्यस्व।राजा·एतेस्वकर्मण्यभियुज्यामहे।चाण·कल्याणंनःवयमपिस्वकर्मण्यभियु
ज्यामहे।राजा·यद्येवंतर्हिकौमुदीमहोत्सवप्रतिषेधस्यतावत्प्रयोजनंश्रोतुमिच्छामि·चाण·वृष
लकौमुदीमहोदीमहोत्सवानुष्ठानस्यकिंप्रयोजनमित्यहमपिश्रोतुमिच्छामि।राजा·प्रथमंता
वन्ममाज्ञायाघातः।चाण·वृषलममापितवाज्ञाव्याघातएवकौमुदीमहोत्सवप्रतिषेधस्यप्रथ

मंप्रयोजनं।कुतः॰ अंभोधीनांतमालप्रभवकिसलयश्यामवेलावनानामापारेभ्यश्चतुर्णांचटुलति
मिकुलक्षोभितांतर्जलानां॥मालेवाम्लानपुष्पातवनृपतिशतैरुह्यतेयाशिरोभिः सामय्येवस्ख
लंतीकथयतिविनयालंकृतंतेप्रभुत्वं॥२५॥अथत्वमेपरमपिप्रयोजनंश्रोतुमिच्छसितदपिक
थयामि।राजा॰कथ्यतामवहितोस्मि।चाणक्यः॰शोणोत्तरेमद्वचनात्कायस्थमचलंब्रूहियत्तद्भद्र
भटप्रभृतीनामितोपरागादपक्रम्यमलयकेतुमाश्रितानांलेख्यपत्रंदीयतामिति।प्रती॰जंअ
ज्जोआणवेदित्तिनिःक्रम्यपुनःप्रविश्यअज्जएदंतंपत्तअं॰चाण॰गृहीत्वावृषलदृश्यतामिदं॰राजा॰
आत्म॰वाचयति॰स्वस्तिश्रीसुगृहीतनामधेयस्यदेवस्यचंद्रगुप्तस्यसहोत्थायिनांप्रधानपुरुषा
णामितोपक्रम्यवुध्यमलयकेतुमाश्रितानांप्रमाणलेख्यपत्रमिदं॰तत्रप्रथममेवतावत्गजाध्यक्षो
भद्रभटः॰अश्वाध्यक्षोपुरुषदत्तः॰महाप्रतीहारस्यचंद्रभानोर्भागिनेयोडिंगरातः॰देवस्यस्वज

मु·रा·
२९
29

नसंबंधीमहाराजोवलदेवगुप्तः देवस्यैवकुमारसेवकोराजसेनः सेनापतेःसिंहवलस्यकनीयान्भ्राता
भागुरायणः मालवराजपुत्रोलोहिताक्षः क्षत्रगणमुख्योविजयवर्मेति एतेवयदेवस्यकार्येऽवहिता
स्मइति· श्वीग्यक्षौभद्रभटपुरुषदत्तनामानौतौखलुस्त्रीमद्यमृगयाशीलौहस्त्यश्वावेक्षणाऽनभि
युक्तौमयाऽधिकाराभ्यामवरोप्यस्वजीवनमात्रेणैवस्थापिताविति परपक्षेस्वेनस्वेनाधिकारेणात्म
मलयकेतुमाश्रितौयावेतौडिंगरातवलगुप्ताख्यौतावत्यन्तलोभाभिभूतौत्वद्दत्तजीवनमवहुमन्यमानौ
तत्रवहुलभ्यतइत्यपक्रम्यमलयकेतुमाश्रितौ योऽप्यसौभवतःकुमारसेवकोराजसेनइतिसोऽपितववप्र
सादादतिप्रभूतकोशहस्त्यश्वंसहसैवतन्महदैश्वर्यमवाप्यपुनरुच्छेदशंकयाऽपक्रम्यमलयकेतु
माश्रितः। योऽयमपरःसेनापतेःसिंहवलस्यकनीयान्भ्राताभागुरायणःसोऽपितत्रकालपर्वतकेनस
हसमुत्पन्नसौहार्दःतत्प्रीत्याचपितातेचाणक्येनव्यापादितइत्युत्पाद्यरहसित्रासयित्वामलयकेतु

श्री॰
२९

मपवाहितवान्॥ ततो भवदपथ्यकारिषु चंदनदासादिषु निगृहीतेषु दोषाऽऽशंकयाऽपक्रम्य मलयके
तुमाश्रितः तेनाप्यसौ मम प्राणरक्षक इति कृतज्ञतामनुवर्त्तमानेन चात्मनोऽनंतरममात्यपदे स्थापि
तः। यौ तौ लोहिताक्ष विजयवर्माणौ तावप्यतिमानित्वात्स्वदायादेभ्यस्त्वत्पादोपमानमसहमानौ म
लयकेतुमाश्रितौ। इत्येतेषामपरागहेतवः। राजा। एवमेतेषु विज्ञातेष्वपरागहेतुषु क्षिप्रमेव कस्मा
न्न प्रतिविहितमार्येण। चाणक्यः· वृषल न यारितं प्रतिविधातुं· राजा· किमकौशलादुत प्रयोजनापेक्षया·
चाणक्यः· कथमकौशलं भविष्यति प्रयोजनापेक्षयैव· राजा· प्रयोजनमिदानीं श्रोतुमिच्छामि· चाणक्यः· श्रूय
तामवधार्यतां च· इह विरक्तानां प्रकृतीनां द्विविधं प्रतिविधानं। अनुग्रहो निग्रहश्च· अनुग्रहस्ता
वदाक्षिप्ताधिकारयोर्भद्रभटपुरुषदत्तयोः पुनरधिकारारोपणमेव· अधिकारश्च तादृशेषु व्यस
नयोगादनभियुक्तेषु पुनरारोप्यमाणः सकलमेव राज्यस्य मूलं हस्त्यश्वमवसादयेत्· डिंगरातबलगु

मयोरतिलुब्धयोः सकलराज्यप्रदानेनाप्यपरितुष्टतोरनुग्रहः कथंशक्यः राजसेनभागुरायणयोस्तु
धनप्राणाशभीतयोः कुतोनुग्रहस्यावकाशः लोहिताक्षविजयवर्मणोरपि दायादमसहमानयोरति
मानिनोः कीदृशोनुग्रहः प्रीतिजनयिष्यतीति परिहृतः पूर्वः पक्षः। उत्तरोपि खलु वयमपि नंदैश्वर्यस
हास्थापिनः प्रधानपुरुषाः उत्खातेन नंदेनपीडयंतोनंदकुलानुरक्तानां प्रकृतीनामविश्वास्याएव
भवामइत्यतः परिहृतएव॰ तदेवमनुगृहीतास्मत्पक्षोराक्षसोपदेशप्रवणोमहीयसाम्लेच्छबलेन
परिवृतः पितृवधामर्षीपर्वतकपुत्रोमलयकेतुरस्मानभियोक्तुमुद्यतः सोयंव्यायामकालोनोत्सव
कालइतिदुर्गसंस्कारेप्रारब्धव्ये किंकौमुदीमहोत्सवेनेतिप्रतिषिद्धः॰ राजा॰ आर्यबहुप्रष्टव्यमत्र॰ चा
णः॰ वृषलविस्रब्धंपृच्छ॰ ममापिबह्वाख्येयमत्र॰ राजा॰ आर्य सोप्यस्यसर्वस्यानर्थस्यहेतुर्मलयकेतु
कस्मादयक्रामन्नुपेक्षितः। चाणः। वृषल अनुपेक्षणेद्वयीगतिः निगृह्येतवाप्रतिश्रुतंराज्यार्द्धंप्र

प्रतिपाद्येतवा·निग्रहोतावत्पर्वतकोऽस्माभिरेवव्यापादितइतिकृतमतायाःस्वहस्तोटङ्कःस्यात्·
प्रतिश्रुतराज्यार्द्धप्रतिपादनेपिपर्वतकविनाशःकेवलंकृतघ्नतामात्रफलःस्यादितिमलयकेतु
रूपक्रामन्नुपेक्षितः·राजा·अत्रतावदेवं·राक्षसःपुनरिहैववर्त्तमानआर्येणोपेक्षितइतिकिमत्र
मार्यस्य·चाणा·राक्षसोपिस्वामिनिस्थिरानुरागत्वात्सुचिरमेकत्रसंवासाच्चशीलज्ञानांनंदानुर
क्तानांप्रकृतीनामत्यंतविश्वास्यःप्रज्ञापुरुषकाराभ्यामुपेतःसहायसंपदाभियुक्तःकोशवानिहैवां
तर्नगरेवर्त्तमानःखलुमहांतमंतःप्रकोपमुत्पादयेत·दूरीकृतस्तुवाह्यमर्थंविकुर्वन्नपिकथमप्यु
पायैर्वशयितुंशक्यइत्ययमत्रस्थएवहृदयेशयःशंकुरिवोद्धृत्यदूरीकृतः·राजा·आर्यकस्माद्वा
विक्रम्यनगृहीतः।चाण·राक्षसःखल्वसौविक्रम्यगृह्यमाणोयुष्मद्बलानिबहूनिनाशयेत्स्वयंवा
विनश्येत·एवंसत्युभयथापिदोषः।पश्य·सहिभृशमुपयुक्तोपयुपेप्याहितायांनतुवृषलवियुक्तास्या

दृष्टेनैवपुंसा ऽ अथतवबलमुत्सान्यातयेत्सापिपीडावनगजइवतस्मात्सो ऽभ्युपायैर्विधेयः॥२५॥राजा·
तन्नशक्नुमोवयमार्यस्यमतिमतिशायितुंसर्वथा ऽमात्यराक्षसएवात्रप्रशस्यहरः।चाणः सक्रोधं·नभ
वानितिवाक्यशेषः।नतावत्·मौर्यबलंतेनकिंकृतं।राजा·श्रूयतांखलुयेनमहात्मना·लब्धायांपुरियाव
दिच्छमुषितंकृत्वापदंनोगलेव्याघातोजयघोषणादिषुबलादस्मत्कुलानांकृतः।अत्यर्थंविपुलैःस
नीतिविभवैःसंमोहमायाहितोविश्वास्येष्वपिविश्वसंतिमतयोनस्वेषुवर्गेषुनः॥२६॥चाण·विहस
एतत्कृतंराक्षसेनवृषलमपायुनज्ञातंनंदमिवभवंतमुद्धात्यभवानिवभूतलमलयकेतुरभिराज्यप
देनियोजितइति॥राजाः अनेनैवेदमनुष्ठितंकिमत्रार्यस्य॥चाण·हेमत्सरित·आरुह्यारूढकोप
स्फुरणाविषमिताग्रांगुलीमुक्तचूडांलोकप्रत्यक्षमुग्रांसकलरिपुकुलोत्सादन्दीर्घांप्रतिज्ञां·केना
न्येनावलिप्तानवनवतिशतद्रव्यकोटीश्वरास्तेनंदाःपर्यायभूताःपशवइवहताःपश्यतोराक्षसस्य॥

॥२७॥ अपि च · गृध्रैराबद्धचक्रं वियति विचलितैर्दीर्घनिःकंपपक्षैर्धूमैर्ध्वस्तार्कभासां सघनमि
व दिशां मंडलं दर्शयंतः । नंदैरानंदयंतः पितृवननिलयान्प्राणिनः पश्य चैतान्निर्वांत्यद्यापि नैते
स्नुतबहलवसावाहिनो हव्यवाहाः ॥२८॥ राजा · अन्येनैवेदमनुष्ठितं । चाण · आः केन · राजा · नं
दकुलविद्वेषिणा दैवेन · चाण · दैवमविद्वांसः प्रमाणयंति । राजा · विद्वांसोप्यविकत्थना भव
